श्री महासवित्रे नमः ।

श्रीयाज्ञवल्क्यगुरुभ्योनमः ।

कण्वकात्यायनादि महर्षिभ्यो नमः ।

# श्री वाजसनेय (शुक्लयजुर्वेद)

# काण्वमन्त्रामृतम् ।

## (रुद्र-चमक-पुरुषसूक्तादि संपुटितम्)




<u>प्रकाशनम्</u>

काण्वकुलपतीनां इञ्जिक्कोल्लै

श्रीचिदंबरघनपाठिमहोदयानां

अन्तेवासिभिः श्री परशुरामघनपाठिभिः

संशोध्य प्रकाशितम् ॥

प्रकाशकाः :- अध्यापकाः, श्रीयाज्ञवल्क्यगुरुकुलम्
No 23/7 NEDUNCHEZHIAN STREET
VIJAYALAKSHI PURAM,
AMBATTUR, CHENNAI- 600053
PHONE- 044-26571307

मूल्यम् :- काण्वशाखाध्येतॄणां उपकाराय
मूल्यं विना प्रदीयते ।

पुस्तकप्राप्तिस्थानम् :- अध्यापकाः, श्रीयाज्ञवल्क्यगुरुकुलम्
No 23/7 NEDUNCHEZHIAN STREET
VIJAYALAKSHI PURAM,
AMBATTUR, CHENNAI- 600053
PHONE- 044-26571307

मुद्रणम् :- HANI PRINTERS, # 3-7-209/c,
Giddangi St, TIRUPATI. 517501
Cell- 9848084920, 9291585027

इदं काण्वमन्त्रामृतम्
अम्बत्तूर् श्रीयाज्ञवल्क्यगुरुकुलाध्यापकानां
श्रीयुत इञ्जिकोल्लै
परशुरामघनपाठिमहोदयानां
शताब्दीवैभवे
०२–८–२०१३ दिनाङ्के प्रकाशितम् ।

अमोघा आशिषः समुल्लसन्तु ।
मदीयशताव्दजन्मदिने मत्स्मरणार्थं इदं
<u>काण्वमन्त्रामृतं</u>
भवत् करकमलयोः समर्प्यते । इदं गुरुमुखात्
अधीत्य, मनःपाठं कृत्वा, प्रतिदिनं पारायणं कृत्वा पुण्यं
संपाद्य मत्प्रार्थनां सफलां कुरुत ।
ब्रह्मश्री परशुरामघनपाठिनः । अम्बत्तूर् ।
<u>लोकाः समस्ताः सुखिनो भवन्तु ।</u>

## ॥ विषयानुक्रमणिका ॥


| क्र.सं |  |  | पृ.सं |
|---|---|---|---|
| 1 | गुरुप्रार्थना | – | VI |
| 2 | गणपति–सरस्वतीप्रार्थना | – | VII |
| 3 | उपाकर्मसूत्रम् | – | VIII |
| 4 | श्रीरुद्रम्–शतरुद्रीयमन्त्राः | – | 01 |
| 5 | चमकाध्यायः (वसोर्धारामन्त्राः) | – | 19 |
| 6 | पुरुषसूक्तम् | – | 31 |
| 7 | महाशान्तिसूक्तम् | – | 37 |
| 8 | ईशावास्योपनिषत् | – | 41 |
| 9 | विष्णुसूक्तम् | – | 45 |
| 10 | अग्निसूक्तम् | – | 47 |
| 11 | वात्सप्रसूक्तम् | – | 49 |
| 12 | अधिश्रवणमन्त्राः | – | 51 |
| 13 | पूर्णाहुतिसूक्तम् | – | 67 |
| 14 | सूर्यसूक्तम् | – | 69 |
| 15 | अथाभ्यारोहजपः | – | 73 |
| 16 | मण्डलब्राह्मणम् | – | 74 |
| 17 | भद्रसूक्तम् | – | 82 |
| 18 | शिवसङ्कल्पमन्त्राः | – | 84 |
| 19 | रुद्रध्यानश्लोकाः | – | 85 |
| 20 | ओषधिसूक्तम् | – | 87 |
| 21 | राष्ट्रभृत्सूक्तम् | – | 91 |
| 22 | नवग्रहसूक्तम् | – | 94 |
| 23 | दिक्पालकमन्त्राः | – | 99 |
| 24 | आदित्यहृदयम् | – | 103 |
| 25 | आर्याद्वादशकम्,सूर्यकवचम् | – | 107 |

| | | | |
|---|---|---|---|
| 26 | श्रीसूक्तम् | – | 111 |
| 27 | दुर्गासूक्तम् | – | 114 |
| 28 | सरस्वतीसूक्तम् | – | 115 |
| 29 | अशनिनिवारणमन्त्रः, स्वापकाले जप्यमन्त्रः | – | 117 |
| 30 | आयुष्यसूक्तम् | – | 118 |
| 31 | प्रातःस्मरणम् | – | 120 |
| 32 | अधीतस्य अविस्मरणमन्त्रः | – | 123 |

–इति शम्–

## गुरुप्रार्थना ।

ओ३म् भूर्भुवः स्वः ।

तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।

धियो यो नः प्रचोदयात् । श्रीमहा सवित्रे नमः ।

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यन्नत्वा कृतकृत्याः स्युस्तन्नमामि गजाननम् ॥
व्यासः पराशरमुनौ पितरि स्थितेऽपि
साक्षात्स्वयं मधुहरोऽपि यमेव वव्रे ।
आचार्यमद्भुतगुणोत्करराजमानं तं
याज्ञवल्क्यगुरुमेव सदा नतोऽस्मि ॥ आदित्यपुराणम् ॥
वन्देऽहं मङ्गलात्मानं भास्वन्तं वेदविग्रहम् ।
याज्ञवल्क्यं मुनिश्रेष्ठं जिष्णुं हरिहरप्रभम् ।
जितेन्द्रियं जितक्रोधं सदा ध्यानपरायणम् ।
आनन्दनिलयं वन्दे योगानन्दं मुनीश्वरम् ॥
प्रणौम्याद्यं दिनमणिं योगीश्वरशिरोमणिम् ।
सर्वज्ञं याज्ञवल्क्यं तच्छिष्यं कात्यायनं मुनिम् ।
याज्ञवल्क्यसमारंभां कण्वयोगीसमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरंपराम् ॥
भानुगुप्तायातयामं वेदमानीय यो भुवि ।
अध्यापयत्कण्वमुख्यान् तस्मै वेदात्मने नमः ॥
अभिवाद्य गुरून्सर्वान् आदित्यादाचिदंवरम् ।
श्रीवाजसनेयकाण्वमन्त्रामृतं प्रकाश्यते ॥

## ॥ अथ गणपतिप्रार्थनामन्त्रः ॥

हरिः ॐ गणानान्त्वा गणपतिँ हवामहे प्रियाणान्त्वा
प्रियपतिँ हवामहे । निधीनान्त्वा निधिपतिँ हवामहे
वसो मम ॥ श्री महागणाधिपतये नमः ॥

## ॥ अथ सरस्वतीप्रार्थनामन्त्राः ॥

ॐ प्र णो यच्छत्वर्यमा प्र पूषा प्र सरस्वती ।
प्रवाग्देवी ददातु नः।

अर्यमणं बृहस्प्पतिमिन्द्रन्दानाय चोदय ।
वाचँ व्विष्णुँ सरस्वतीँ सवितारञ्च वाजिनम् ॥

श्री महा सरस्वत्यै नमः॥

## ॥ उपाकर्मसूत्रम् ॥

अथातोऽध्यायोपाकर्म । ओषधीनां प्रादुर्भावे श्रवणेन श्रावण्यां पौर्णमास्याᳬ श्रावणस्य पञ्चमीᳬ हस्तेन वाज्यभागाविष्ट्वा आज्याहुतीर्जुहोति । पृथिव्या–अग्नये–इत्यृग्वेदे, अन्तरिक्षाय–वायव इति यजुर्वेदे, दिवे–सूर्यायेति सामवेदे, दिग्भ्यश्चन्द्रमस इत्यथर्ववेदे, ब्रह्मणे– छन्दोभ्यश्चेति सर्वत्र, प्रजापतये देवेभ्य ऋषिभ्यः श्रद्धायै मेधायै सदसस्पतये अनुमतय इति, चैतदेव व्रतादेशनविसर्गेषु सदसस्पति मित्यक्षतधानास्त्रिः सर्वेऽनुपठेयुर्हुत्वाहुत्वौदुम्बर्य स्तिस्रस्तिस्रः समिध आदध्युरार्द्राः सपलाशा घृताक्ताः सावित्र्या ब्रह्मचारिणश्च पूर्वकल्पेन शन्नो भवन्त्वित्यक्षतधाना अखादन्तः प्राश्नीयुर्दधिक्राव्ण इति दधि भक्षयेयुः, स यावन्तं गणमिच्छेत् तावतस्तिलानाकर्षफलकेन जुहुयात्सावित्र्या शुक्रज्योति रित्यनुवाकेन वा प्राशनान्ते प्रत्यङ्मुखेभ्य उपविष्टेभ्यः, ओंकार मुक्त्वा त्रिश्च सावित्रीमध्यायादीन् प्रब्रूयादृषिमुखानि बह्वृचानां पर्वाणि च्छन्दोगानाᳬ सूक्तान्यथर्वणानाᳬ सर्वे जपन्ति सह नोऽस्तु सह नोऽवतु सह न इदं वीर्यवदस्तु ब्रह्म । इन्द्रस्तद्वेद येन यथा न विद्विषामह इति त्रिरात्रं नाधीयीरँल्लोम नखाना मनिकृन्तनमेके प्रागुत्सर्गात् ॥ (पारस्करगृह्यसूत्रम्–२–१०)

असौ योऽवसर्पति नीलग्रीवो विलोहितः । उतैनङ्गोपा

अदृश्रन्नदृश्रन्नुदहार्यः स दृष्टो मृळयाति नः ॥७॥

नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीह्ळुषे ।

अथो ये अस्य सत्वानोऽहन्तेभ्योऽकरन्नमः ॥८॥

प्रमुञ्च धन्वनस्त्वमुभयोरार्त्न्योर्ज्याम् ।

याश्च ते हस्त इषवः पुरा ता भगवो वप ॥९॥

विज्यन्धनुः कपर्दिनो विशल्यो बाणवाँ उत ।

अनेशन्नस्य या इषव आभुरस्य निषङ्गधिः ॥१०॥

परि ते धन्वनो हेतिरस्मान् वृणक्तु विश्वतः ।

अथो य इषुधिस्तवारे अस्मन्निधेहि तम् ॥११॥

या ते हेतिर्मीह्ळुष्टम हस्ते बभूव ते धनुः ।

तयास्मान् विश्वतस्त्वमयक्ष्मया परि भुज ॥१२॥

अवतत्य धनुष्ट्वꣳ सहस्राक्ष शतेषुधे ।

निशीर्य शल्यानां मुखा शिवो नः सुमना भव ॥१३॥

नमस्त आयुधायानातताय धृष्णवे ।

उभाभ्यामुत ते नमो बाहुभ्यान्तव धन्वने ॥१४॥

मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न

उक्षितम् । मा नोऽवधीः प्पितरं मोत मातरं मा नः

प्प्रियास्तन्वो रुद्र रीरिषः ॥१५॥

मा नस्तोके तनये मा न आयुषि मानो गोषु मा नो अश्वेषु

रीरिषः । मा नो वीरान् रुद्र भामिनोऽवधीर्हविष्मन्तः सदमित्

त्वा हवामहे ॥१६॥१॥

नमो हिरण्यबाहवे सेनान्ये दिशाञ्च पतये नमो

नमो वृक्षेभ्यो हरिकेशेभ्यः प्पशूनां पतये नमः ।

नमः शष्पिञ्जराय त्विषीमते पथीनां पतये नमो

## अथ श्रीरुद्राध्यायः॥ (शतरुद्रीयमन्त्राः ॥)

ॐ नमो भगवते रुद्राय ॥ ॐनमस्ते रुद्र मन्यव

उतो त इषवे नमः । बाहुभ्यामुत ते नमः ॥१॥

या ते रुद्र शिवा तनूरघोरापापकाशिनी ।

तया नस्तन्वा शन्तमया गिरिशन्ताभि चाकशीहि ॥२॥

यामिषुङ्गिरिशन्त हस्ते बिभर्ष्यस्तवे ।

शिवाङ्गिरित्र ताङ्कुरु मा हिꣳसीः प्पुरुषञ्जगत् ॥३॥

शिवेन वचसा त्वा गिरिशाच्छा वदामसि ।

यथा नः सर्वमिज्जगदयक्ष्मꣳसुमना असत् ॥४॥

अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् । अहीꣳश्च

सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्योऽधराचीः प्परा सुव ॥५॥

असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः । ये चैनꣳरुद्रा

अभितो दिक्षु श्रिताः सहस्रशोऽवैषाꣳ हेळ ईमहे ॥६॥

नमो हरिकेशायोपवीतिने पुष्टानां पतये नमः ॥१॥

नमो बभ्रुशायाव्याधिनेऽन्नानां पतये नमो

नमो भवस्य हेत्यै जगतां पतये नमः ।

नमो रुद्रायाततायिने क्षेत्राणां पतये नमो

नमः सूतायाहन्त्यै वनानां पतये नमः ॥२॥

नमो रोहिताय स्थपतये वृक्षाणां पतये नमो

नमो भुवन्तये वारिवस्कृतायौषधीनां पतये नमः ।

नमो मन्त्रिणे वाणिजाय कक्षाणां पतये नमो

नम उच्चैर्घोषायाक्रन्दयते पत्तीनां पतये नमः ॥३॥

नमः कृत्स्नायताय धावते सत्वनां पतये नमो

नमः सहमानाय निव्याधिन आव्याधिनीनां पतये नमः ।

नमः ककुभाय निषङ्गिणे स्तेनानां पतये नमो

नमो निचेरवे परिचरायारण्यानां पतये नमः ॥४॥

नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो
नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमः ।
नमः सृकायिभ्यो जिघाᳪसद्भ्यो मुष्णतां पतये नमो
नमोऽसिमद्भ्यो नक्तञ्चरद्भ्यो विकृन्तानां पतये नमः ॥५॥२॥

नम उष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमो
नम इषुमद्भ्यो धन्वायिभ्यश्च वो नमः ।
नम आतन्वानेभ्यः प्रति दधानेभ्यश्च वो नमो
नम आयच्छद्भ्योऽस्यद्भ्यश्च वो नमः ॥१॥
नमो विसृजद्भ्यो विध्यद्भ्यश्च वो नमो
नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमः ।
नमः शयानेभ्य आसीनेभ्यश्च वो नमो
नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमः ॥२॥

नमः सभाभ्यः सभापतिभ्यश्च वो नमो

नमोऽश्वेभ्योऽश्वपतिभ्यश्च वो नमः ।

नम आव्याधीनीभ्यो विविध्यन्तीभ्यश्च वो नमो

नम उगणाभ्यस्तृꣳहतीभ्यश्च वो नमः ॥३॥

नमो गणेभ्यो गणपतिभ्य वो नमो

नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमः ।

नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो

नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमः ॥४॥

नमः सेनाभ्यः सेनानिभ्यश्च वो नमो

नमो रथिभ्यो अरथेभ्यश्च वो नमः ।

नमः क्षतृभ्यः सङ्ग्रहीतृभ्यश्च वो नमो

नमो महद्भ्यो अर्भकेभ्यश्च वो नमः ॥५॥३॥

नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो
नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमः ।
नमो निषादेभ्यः पुञ्जिष्ठेभ्यश्च वो नमो
नमः श्वनिभ्यो मृगयुभ्यश्च वो नमः ॥१॥
नमः श्वभ्यः श्वपतिभ्यश्च वो नमो नमो भवाय च रुद्राय च
नमः शर्वाय च पशुपतये च नमो
नीलग्रीवाय च शितिकण्ठाय च ॥२॥
नमः कपर्दिने च व्युप्तकेशाय च नमः
सहस्राक्षाय च शतधन्वने च ।
नमो गिरिशयाय च शिपिविष्टाय च नमो
मीह्ळुष्टमाय चेषुमते च ॥३॥
नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च ।
नमो वृद्धाय च सवृधे च नमोऽग्र्याय च प्रथमाय च ॥४॥

नम आशवे चाजिराय च नमः शीघ्र्याय च शीभ्याय च ।
नम ऊर्म्याय चावस्वन्याय च नमो नादेयाय च द्वीप्याय च ॥५॥४॥

नमो ज्येष्ठाय च कनिष्ठाय च नमः प्पूर्वजाय चापरजाय च ।
नमो मध्यमाय चापगल्भाय च नमो जघन्याच बुध्न्याय च ॥१॥
नमः सोभ्याय च प्रतिसर्याय च नमो याम्याय च क्षेम्याय च ।
नमःश्लोक्याय चावसान्याय चनम उर्वर्याय च खल्याय च॥२॥
नमो वन्याय च कक्ष्याय च नमः श्रवाय च प्रतिश्रवाय च ।
नम आशुषेणाय चाशुरथाय च नमः शूराय चावभेदिने च॥३॥
नमो बिल्मिने च कवचिनेच नमो वर्मिणे च वरूथिने च ।
नमःश्रुताय च श्रुतसेनाय च नमो दुन्दुभ्यायचाहनन्याय च॥४॥
नमो धृष्णवे च प्रमृशाय च नमो निषङ्गिणे चेषुधिमते च।
नमस्तीक्ष्णेषवे चायुधिने च नमःस्वायुधाय च सुधन्वने च ॥५॥५॥

नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च ।

नमः कुल्याय च सरस्याय च नमो नादेयाय च वैशन्ताय च ॥१॥

नमः कूप्याय चावट्याय च नम ईध्रियाय चातप्याय च ।

नमो मेघ्याय च विद्युत्याय च नमो वर्ष्याय चावर्ष्याय च ॥२॥

नमो वात्याय च रेष्म्याय च नमो वास्तव्याय च वास्तुपाय च ।

नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च ॥३॥

नमः शङ्गवे च पशुपतये च नम उग्राय च भीमाय च ।

नमोऽग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च ॥४॥

नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय ।

नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय

च नमः शिवाय च शिवतराय च ॥५॥६॥

नमः पार्याय चावार्याय च नमः प्रतरणाय चोत्तरणाय च ।

नमस्तीर्थ्याय च कूल्याय च नमः शष्प्याय च फेन्याय च ॥१॥

नमः सिकत्याय च प्रवाह्याय च नमः किꣳशिलाय च क्षयणाय च । नमः कपर्दिने च पुलस्तिने च नम इरिण्याय च प्रपथ्याय च ॥२॥

नमो व्रज्याय च गोष्ठ्याय च नमस्तल्प्याय च गेह्याय च । नमो हृद्याय च निवेष्प्याय च नमः काट्याय च गह्वरेष्ठाय च ॥३॥

नमः शुष्क्याय च हरित्याय च नमः पाꣳसव्याय च रजस्याय च । नमो लोप्याय चोलप्याय च नम ऊर्व्याय च सूर्व्याय च ॥४॥

नमः पर्ण्याय च पर्णशदाय च नम उद्गुरमाणाय चाभिघ्नते च नम आखिदते च प्रखिदते च नम इषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमः । नमो वः किरिकेभ्यो देवानाꣳ हृदयेभ्यो नमो विचिन्वत्केभ्यो नमो विक्षिणत्केभ्यो नम आनिर्हतेभ्यः ॥५॥७॥

द्रापे अन्धसस्पते दरिद्र नीललोहित । आसां प्रजानामेषां
पशूनां मा भेर्मा रोङ्मो च नः किञ्चनाममत् ॥१॥
इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः ।
यथा शमसद्द्विपदे चतुष्पदे विश्वं पुष्टङ्ग्रामे अस्मिन्ननातुरम् ॥२॥
या ते रुद्र शिवा तनूः शिवा विश्वाहा भेषजी ।
शिव ऋतस्य भेषजी तया नो मृळ जीवसे ॥३॥
परि णो हेती रुद्रस्य वृज्यात् परि त्वेषस्य दुर्मतिर्मही गात् ।
अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृळ ॥४॥
मीह्ळुष्टम शिवतम शिवो नः सुमना भव ।
परमे वृक्ष आयुधन्निधाय कृत्तिं व्वसान
आचर पिनाकं बिभ्रदागहि ॥५॥
विकिरिद्र विलोहित नमस्ते अस्तु भगवः ।
यास्ते सहस्र॑ हेतयोऽन्यमस्मन्नि वपन्तु ताः ॥६॥

सहस्राणि सहस्रशो बाह्वोस्तव हेतयः ।
तासामीशानो भगवः पराचीना मुखा कृधि ॥७॥
असङ्ख्याता सहस्राणि ये रुद्रा अधि भूम्याम् ।
तेषाꣳसहस्रयोजनेऽव धन्वानि तन्मसि ॥८॥
अस्मिन्महत्यर्णवेऽन्तरिक्षे भवा अधि ।
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥९॥
नीलग्रीवाः शितिकण्ठा दिवꣳ रुद्रा उपश्रिताः ।
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥१०॥
नीलग्रीवाः शितिकण्ठाः शर्वा अधः क्षमाचराः ।
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥११॥
ये वृक्षेषु शष्पिञ्जरा नीलग्रीवा विलोहिताः ।
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥१२॥
ये भूतानामधिपतयो विशिखासः कपर्दिनः ।

तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥१३॥

ये पथां पथिरक्षिण ऐळबृदा आयुर्युधः ।

तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥१४॥

ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः ।

तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥१५॥

येऽन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् ।

तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥१६॥

य एतावन्तश्च भूयाꣳसश्च दिशो रुद्रा वितस्थिरे ।

तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥१७॥

नमोऽस्तु रुद्रेभ्यो ये दिवि येषां व्वर्षमिषवः ।

तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः।

तेभ्यो नमो अस्तु तेनो मृळयन्तु ते नोऽवन्तु ।

तेयन्द्विष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दध्मः ।

नमोऽस्तु रुद्रेभ्यो येऽन्तरिक्षे येषाँ व्वात इषवः ।

तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः।

तेभ्यो नमो अस्तु तेनो मृळयन्तु ते नोऽवन्तु ।

तेयन्द्विष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दध्मः ।

नमोऽस्तु रुद्रेभ्यो ये पृथिव्याँ य्येषामन्नमिषवः ।

तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः।

तेभ्यो नमो अस्तु तेनो मृळयन्तु ते नोऽवन्तु ।

तेयन्द्विष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दध्मः ॥१८॥६४॥

ॐ नमो भगवते रुद्राय[१] ।

ॐ वय९ँ सोम व्रते तव मनस्तनूषु विभ्रतः ।

प्रजावन्तः सचेमहि ॥६५॥

---

१, श्रीरुद्रे बहवो रुद्राः पठिताः । शतरुद्रीयमित्यत्र शतशब्दः बह्वर्थवाचि, शतपथशब्दवत् । संप्रदाये श्रीरुद्राध्यायमन्त्रैः सह शतसंख्यापूरणार्थं वय९ँ सोम इत्यादीन् मन्त्रानपि जपन्ति । ते अपि अत्र संयोजिताः ॥

एष ते रुद्रभागः सह स्वस्राम्बिकया तञ्जुषस्व स्वाहा ।

एष ते रुद्र भाग आखुस्ते पशुः ॥६६॥

अव रुद्रमदीमह्यव देवन्त्र्यम्बकम् । यथा नो वस्यसस्करद्यथा

नः श्रेयसस्करद्यथा नो व्यवसाययात् ॥६७॥

भेषजमसि भेषजङ्गवेऽश्वाय पुरुषाय भेषजम् ।

सुगं मेषाय मेष्यै ॥६८॥

त्र्यम्बकँ यजामहे सुगन्धिं पुष्टिवर्द्धनम् ।

उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥६९॥

त्र्यम्बकँ यजामहे सुगन्धिं पतिवेदनम् ।

उर्वारुकमिव बन्धनादितो मुक्षीय मामुतः ॥७०॥

एतेन रुद्रावसेन परो मूजवतोऽतीहि ।

अवततधन्वा पिनाकावसः कृत्तिवासा अहिँसन्नः

शिवः शान्तोऽतीहि ॥७१॥

यज्जाग्रतो दूरमुदैति दैवन्तदु सुप्तस्य तथैवैति ।

दूरङ्गमञ्ज्योतिषाञ्ज्योतिरेकन्तन्मे मनः शिवसङ्कल्पमस्तु ॥७२॥

न ते दूरे परमा चिद्रजाᳪस्यातु प्र याहि हरिवो हरिभ्याम् ।

स्थिराय वृष्णो सवना कृतेमा युक्ता ग्रावाणः समिधाने अग्नौ॥

अषाह्ळँ य्युत्सु पृतनासु पप्रिᳪ स्वर्षामप्साँ वृजनस्य

गोपाम् । भरेषुजाᳪ सुक्षितिᳪ सुश्रवसञ्जयन्तन्त्वामनु

मदेम सोम ॥७४॥

उग्रश्च भीमश्च ध्वान्तश्च धुनिश्च ।

सासह्वाᳪश्चाभियुग्वा च विक्षिपः स्वाहा ॥७५॥

अग्निᳪ हृदयेनाशनिᳪ हृदयाग्रेण पशुपतिङ्कृत्स्नहृदयेन

भवँ य्यक्ना । शर्वं मतस्नाभ्यामिशानं मन्युना

महादेवमन्त्तःप्पर्शव्येनोग्रन्देवँ व्वनिष्ठुना वसिष्ठहनुः
शिङ्गीनि कोश्याभ्याम् ॥७६॥

एष ते निरृत्ते भागस्तञ्जुषस्व स्वाहाग्निनेत्रेभ्यो देवेभ्यः
प्पुरस्सद्भ्यः स्वाहा यमनेत्रेभ्यो देवेभ्यो दक्षिणसद्भ्यः
स्वाहा । विश्वदेवनेत्रेभ्यो देवेभ्यः प्पश्चात्सद्भ्यः स्वाहा
मित्रावरुणनेत्रेभ्यो वा मरुन्नेत्रेभ्यो वा देवेभ्य उत्तरसद्भ्यः
स्वाहा । सोमनेत्रेभ्यो देवेभ्य उपरिसद्भ्यो दुवस्वद्भ्यः
स्वाहा ॥७७॥

ये देवा अग्निनेत्राः प्पुरस्सदस्तेभ्यः स्वाहा ये देवा
यमनेत्रा दक्षिणसदस्तेभ्यः स्वाहा । ये देवा
विश्वदेवनेत्राः प्पश्चात्सदस्तेभ्यः स्वाहा ये देवा
मित्रावरुणनेत्रा वा मरुन्नेत्रा वोत्तरसदस्तेभ्यः स्वाहा ।

ये देवाः सोमनेत्रा उपरिसदो दुवस्वन्तस्तेभ्यः स्वाहा ॥७८॥

मीढुष्टम शिवतम शिवो नः सुमना भव ।
परमे वृक्ष आयुधन्निधाय कृत्तिँ व्वसान
आचर पिनाकं बिभ्रदागहि ॥७९॥
विकिरिद्र विलोहित नमस्ते अस्तु भगवः ।
यास्ते सहस्रँ हेतयोऽन्यमस्मन्नि वपन्तु ताः ॥८०॥
सहस्राणि सहस्रशो बाह्वोस्तव हेतयः ।
तासामीशानो भगवः प्पराचीना मुखा कृधि ॥८१॥
असङ्ख्याता सहस्राणि ये रुद्रा अधि भूम्याम् ।
तेषाँ सहस्रयोजनेऽव धन्वानि तन्मसि ॥८२॥

ईशावास्यं अष्टादशमन्त्राः (41 पृष्ठे द्रष्टव्यः)

इति शतरुद्रीयमन्त्राः ।

## चमकाध्यायः (वसोर्धारामन्त्राः)

इमᳫं स्तनमूर्जस्वन्तन्धयापां प्रपीनमग्ने सरिरस्य मध्ये ।
उत्सञ्जुषस्व शतधारमर्वन्त्समुद्रियᳫं सदनमा विशस्व ॥१॥
घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम ।
अनुष्वधमा वह मादयस्व स्वाहाकृतँ वृषभ वक्षि हव्यम् ॥२॥
समुद्रादूर्मिर्मधुमाँ उदारदुपाᳫंशुना सममृतत्वमानट् ।
घृतस्य नाम गुह्यँ यदस्ति जिह्वा देवानाममृतस्य नाभिः॥३॥
वयन्नाम प्र ब्रवामा घृतस्यास्मिन्यज्ञे धारयामा नमोभिः ।
उप ब्रह्मा शृणवच्छस्यमानञ्चतुःशृङ्गोऽवमीद्गौर एतत् ॥४॥
चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आविवेश ॥५॥
त्रिधा हितं पणिभिर्गुह्यमानङ्गवि देवासो घृतमन्वविन्दन् ।
इन्द्र एकᳫं सूर्य एकञ्जजान वेनादेकᳫं स्वधया निष्टतक्षुः ॥६॥

एता अर्षन्ति हृद्यात्समुद्राच्छतव्रजा रिपुणा नावचक्षे ।
घृतस्यधारा अभि चाकशीमि हिरण्ययो वेतसो मध्यआसाम् ।
सम्यक्स्रवन्ति सरितो न धेना अन्तर्हृदा मनसा पूयमानाः ।
एते अर्षन्त्यूर्मयो घृतस्य मृगाइव क्षिपणोरीशमाणाः ॥७॥
सिन्धोरिव प्राध्वने शूघनासो वातप्रमियः प्पतयन्ति यह्वाः ।
घृतस्य धारा अरुषो न वाजी काष्ठा भिन्दन्नूर्मिभिः
पिन्वमानः॥८॥
अभि प्रवन्त समनेव योषाः कल्याण्य स्मयमानासो अग्निम्।
घृतस्य धाराःसमिधो नसन्त ता जुषाणो हर्यति जातवेदाः॥९॥
कन्याइव वहतुमेतवा उ अञ्ज्यञ्जाना अभिचाकशीमि।
यत्र सोमःसूयते यत्र यज्ञो घृतस्य धारा अभि तत्पवन्ते॥१०॥
अभ्यर्षत सुष्टुतिङ्गव्य माजिमस्मासु भद्रा द्रविणानि धत्त ।
इमं यज्ञन्नयत देवता नो घृतस्य धारा मधुमत्पवन्ते ॥११॥

धामन्ते विश्वं भुवनमधिश्रितमन्तः समुद्रे हृद्यन्तरायुषि ।
अपामनीके समिथे य आभृतस्तमश्याम मधुमन्तन्त ऊर्मिं ॥१२॥१॥

वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे ।
धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे । श्रावश्च मे
श्रुतिश्च मे ज्योतिश्च मे स्वश्च मे यज्ञेन कल्पन्ताम् ॥१॥
प्राणश्च मेऽपानश्च मे व्यानश्च मेऽसु च मे ।
चित्तञ्च म आधीतञ्च मे वाक्च मे मनश्च मे । चक्षुश्च मे
श्रोत्रञ्च मे दक्षश्च मे बलञ्च मे यज्ञेन कल्पन्ताम् ॥२॥
ओजश्च मे सहश्च म आत्मा च मे तनूश्च मे । शर्म च मे
वर्म च मेऽङ्गानि च मेऽस्थीनि च मे । परूँषि च मे
शरीराणि च म आयुश्च मे जरा च मे यज्ञेन कल्पन्ताम्॥३॥
ज्यैष्ठ्यञ्च म आधिपत्यञ्च मे मन्युश्च मे भामश्च मे ।

अमश्च मेऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्षिमा च मे द्राघिमा च मे । वृद्धञ्च मे वृद्धिश्च मे यज्ञेन कल्पन्ताम् ॥३॥२॥

सत्यञ्च मे श्रद्धा च मे जगच्च मे धनञ्च मे । विश्वञ्च मे महश्च मे क्रीळा च मे मोदश्च मे । जातञ्च मे जनिष्यमाणञ्च मे सूक्तञ्च मे सुकृतञ्च मे यज्ञेन कल्पन्ताम् ॥१॥

वित्तञ्च मे वेद्यञ्च मे भूतञ्च मे भविष्यच्च मे । सुगञ्च मे सुपथ्यञ्च म ऋद्धञ्च म ऋद्धिश्च मे । क्लृप्तञ्च मे क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे यज्ञेन कल्पन्ताम् ॥२॥

यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे । विश्वञ्च

मे महश्च मे सँव्विच्च मे ज्ञात्रञ्च मे । सीरञ्च मे
लयश्च मे सूश्च मे प्रसूश्च मे यज्ञेन कल्पन्ताम् ॥३॥
शञ्च मे मयश्च मे प्रियञ्च मेऽनुकामश्च मे । कामश्च
मे सौमनसश्च मे भगश्च मे द्रविणञ्च मे । भद्रञ्च मे
श्रेयश्च मे वसीयश्च मे यशश्च मे यज्ञेन कल्पन्ताम् ॥४॥३॥

ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे ।
घृतञ्च मे मधु च मे सग्धिश्च मे सपीतिश्च मे । कृषिश्च मे
वृष्टिश्च मे जैत्रञ्च म औद्भिद्यञ्च मे यज्ञेन कल्पन्ताम् ॥१॥
ऋतञ्च मेऽमृतञ्च मेऽयक्ष्मञ्च मेऽनामयच्च मे ।
जीवातुश्च मे दीर्घायुत्वञ्च मेऽनमित्रञ्च मेऽभयञ्च मे ।
सुगञ्च मे शयनञ्च मे सूषाश्च मे सुदिनञ्च मे यज्ञेन
कल्पन्ताम् ॥२॥

रयिश्च मे रायश्च मे पुष्टञ्च मे पुष्टिश्च मे । विभु च मे प्रभु च मे पूर्णञ्च मे पूर्णतरञ्च मे । कुयवञ्च मेऽक्षितञ्च मेऽन्नञ्च मेऽक्षुच्च मे यज्ञेन कल्पन्ताम् ॥३॥

व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे । मुद्गाश्च मे खल्वाश्च मे प्रियङ्गवश्च मेऽणवश्च मे । श्यामाकाश्चमे नीवाराश्च मे गोधूमाश्च मे मसूराश्च मे यज्ञेन कल्पन्ताम् ॥४॥४॥

अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे । सिकताश्च मे वनस्पतयश्च मे हिरण्यञ्च मेऽयश्च मे । सीसञ्च मे त्रपु च मे श्यामञ्च मे लोहञ्च मे यज्ञेन कल्पन्ताम् ॥१॥

अग्निश्च म आपश्च मे वीरुधश्च म ओषधयश्च मे । कृष्टपच्याश्च मे कृष्टपच्याश्च मे ग्राम्याश्च मे पशव

रयिश्च मे रायश्च मे पुष्टञ्च मे पुष्टिश्च मे । विभु च मे प्रभु च मे पूर्णञ्च मे पूर्णतरञ्च मे । कुयवञ्च मेऽक्षितञ्च मेऽन्नञ्च मेऽक्षुच्च मे यज्ञेन कल्पन्ताम् ॥३॥

व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे । मुद्गाश्च मे खल्वाश्च मे प्रियङ्गवश्च मेऽणवश्च मे । श्यामाकाश्चमे नीवाराश्च मे गोधूमाश्च मे मसूराश्च मे यज्ञेन कल्पन्ताम् ॥४॥४॥

अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे । सिकताश्च मे वनस्पतयश्च मे हिरण्यञ्च मेऽयश्च मे । सीसञ्च मे त्रपु च मे श्यामञ्च मे लोहञ्च मे यज्ञेन कल्पन्ताम् ॥१॥

अग्निश्च म आपश्च मे वीरुधश्च म ओषधयश्च मे । कृष्टपच्याश्च मे कृष्टपच्याश्च मे ग्राम्याश्च मे पशव

द्यौश्च म इन्द्रश्च मे समाश्च म इन्द्रश्च मे । नक्षत्राणि च म इन्द्रश्च मे दिशश्च म इन्द्रश्च मे यज्ञेनकल्पन्ताम् ॥३॥६॥

अ(ꣳ)शुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च मे । उपा(ꣳ)शुश्च मेऽन्तर्यामश्च म ऐन्द्रवायवश्च मे मैत्रावरुणश्च मे । आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च मे यज्ञेन कल्पन्ताम् ॥१॥

आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च मे । ऐन्द्राग्नश्च मे महावैश्वदेवश्च मे मरुत्वतीयाश्च मे निष्केवल्यश्च मे । सावित्रश्च मे सारस्वतश्च मे पात्नीवतश्च मे हारियोजनश्च मे यज्ञेन कल्पन्ताम् ॥२॥

स्रुचश्च मे चमसाश्च मे वायव्यानि च मे द्रोणकलशश्च मे । ग्रावाणश्च मेऽधिषवणे च मे पूतभृच्च म आधवनीयश्च मे ।

वेदिश्च मे बर्हिश्च मे स्वगाकारश्च मेऽवभृथश्च मे यज्ञेन कल्पन्ताम् ॥३॥

अग्निश्च मे घर्मश्च मेऽर्कश्च मे सूर्यश्च मे । प्राणश्च मेऽश्वमेधश्च मे पृथिवी च मेऽदितिश्च मे । दितिश्च मे द्यौश्च मेऽङ्गुलयः शक्वरयो दिशश्च मे यज्ञेन कल्पन्ताम् ॥४॥

व्रतञ्च म ऋतवश्च मे सँव्वत्सरश्च मे तपश्च मे। अहोरात्रे ऊर्वष्ठीवे बृहद्रथन्तरे च मे यज्ञेन कल्पन्ताम् ॥५॥७॥

एका च मे तिस्रश्च मे तिस्रश्च मे पञ्च च मे पञ्च च मे सप्त च मे सप्त च मे नव च मे नव च म एकादश च म एकादश च मे त्रयोदश च मे त्रयोदश च मे । पञ्चदश च मे पञ्चदश च मे सप्तदश च मे सप्तदश च मे नवदश च मे नवदश च म

एकविꣳशतिश्च म एकविꣳशतिश्च मे त्रयोविꣳशतिश्च मे त्रयोविꣳशतिश्च मे। पञ्चविꣳशतिश्च मे पञ्चविꣳशतिश्च मे सप्तविꣳशतिश्च मे सप्तविꣳशतिश्च मे नवविꣳशतिश्च मे नवविꣳशतिश्च म एकत्रिꣳशच्च म एकत्रिꣳशच्च मे त्रयस्त्रिꣳशच्च मे यज्ञेन कल्पन्ताम् ॥१॥

चतस्रश्च मेऽष्टौ च मेऽष्टौ च मे द्वादश च मे द्वादश च मे षोळश च मे षोळश च मे विꣳशतिश्च मे विꣳशतिश्च मे चतुर्विꣳशतिश्च मे चतुर्विꣳशतिश्च मेऽष्टाविꣳशतिश्च मेऽष्टाविꣳशतिश्च मे। द्वात्रिꣳशच्च मे द्वात्रिꣳशच्च मे षट्त्रिꣳशच्च मे षट्त्रिꣳशच्च मे चत्वारिꣳशच्च मे चत्वारिꣳशच्च मे चतुश्चत्वारिꣳशच्च मे चतुश्चत्वारिꣳशच्च मेऽष्टाचत्वारिꣳशच्च मे यज्ञेन कल्पन्ताम् ॥२॥

त्र्यविश्च मे त्र्यवी च मे दित्यवाट् च मे दित्यौही च मे ।
पञ्चाविश्च मे पञ्चावी च मे त्रिवत्सश्च मे त्रिवत्सा च
मे । तुर्यवाट् च मे तुर्यौही च मे यज्ञेन कल्पन्ताम्॥३॥
पष्ठवाट् च मे पष्ठौही च म उक्षा च मे वशा च मे ।
ऋषभश्च मे वेहच्च मेऽनड्वाꣳश्च मे धेनुश्च मे यज्ञेन
कल्पन्ताम् ॥४॥८॥

वाजाय स्वाहा प्रसवाय स्वाहापिजाय स्वाहा क्रतवे
स्वाहा । वसवे स्वाहाहर्पतये स्वाहा ।
अह्ने मुग्धाय स्वाहा मुग्धाय वैनꣳशिनाय स्वाहा
विनꣳशिन आन्त्यायनाय स्वाहान्त्याय भौवनाय स्वाहा
भुवनस्य पतये स्वाहाधिपतये स्वाहा प्रजापतये स्वाहा ॥१॥
इयन्ते राण्मित्राय यन्तासि यमनः ।

ऊर्जे त्वा वृष्ट्यै त्वा प्रजानान्त्वाधिपत्याय ॥२॥

आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पताञ्चक्षुर्यज्ञेन कल्पता९ श्रोत्रँ य्यज्ञेन कल्पताम् । वाग्यज्ञेन कल्पतां मनो यज्ञेन कल्पतामात्मा यज्ञेन कल्पतां पृष्ठँ य्यज्ञेन कल्पताम् । ब्रह्म यज्ञेन कल्पताँ य्यज्ञो यज्ञेन कल्पता -ञ्ज्योतिर्यज्ञेन कल्पता९ स्वर्यज्ञेन कल्पताम् ॥३॥

स्तोमश्च यजुश्च ऋक्च साम च बृहच्च रथन्तरञ्च । स्वर्देवा अगन्मामृता अभूम प्रजापतेः प्प्रजा अभूम वेट् स्वाहा ॥४॥९॥

**इति चमकाध्यायः (वसोर्धारामन्त्राः) ॥**

## अथ पुरुषसूक्तम् ॥

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिꣳ सर्वत स्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥१॥
पुरुष एवेदꣳ सर्वँ य्यद्भूतँ य्यच्च भाव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥२॥
एतावानस्य महिमातो ज्यायाꣳश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतन्दिवि ॥३॥
त्रिपादूर्ध्व उदैत्पुरुषः प्पादोऽस्येहाभवत्पुनः ।
ततो विष्वङ् व्यक्रामत्साशनानशने अभि ॥४॥
ततो विराळजायत विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥५॥
तस्माद्यज्ञात् सर्वहुतः संभृतं पृषदाज्यम् ।
पशूꣳस्ताꣳश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ॥६॥

तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे ।

छन्दाꣳसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥७॥

तस्मादश्वा अजायन्त ये के चोभयादतः ।

गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥८॥

तँ य्यज्ञं बर्हिषि प्रौक्षन्पुरुषञ्जातमग्रतः ।

तेन देवा अयजन्त साध्या ऋषयश्च ये ॥९॥

यत्पुरुषँ व्यदधुः कतिधा व्यकल्पयन् ।

मुखङ्किमस्यासीत्किं बाहू किमूरू पादा उच्येते ॥१०॥

ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः ।

ऊरू तदस्य यद्वैश्यः प्पद्भ्याꣳ शूद्रो अजायत ॥११॥

चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।

श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥१२॥

नाभ्या आसीदन्तरिक्षꣳ शीर्ष्णो द्यौः समवर्तत ।

पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ अकल्पयन् ॥१३॥
यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तोऽस्यासीदाज्यङ्ग्रीष्म इध्मःशरद्धविः ॥१४॥
सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः ।
देवा यद्यज्ञन्तन्वाना अबध्नन् पुरुषं पशुम् ॥१५॥
यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः॥१६॥१॥

---

अद्भ्यः संभृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्तताग्रे ।
तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे ॥१॥
वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः प्परस्तात् ।
तमेव विदित्वाति मृत्युमेति नान्यः प्पन्था विद्यतेऽयनाय ॥२॥
प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा वि जायते ।

तस्य॒योनिं॒परि॑पश्यन्ति॒धीरा॒स्तस्मि॑न्ह॒तस्थु॒र्भुव॑नानि॒विश्वा॑ ॥३॥

यो दे॒वेभ्य॑ आ॒तप॑ति॒ यो दे॒वानां॑ पु॒रोहि॑तः ।

पूर्वो॑ यो दे॒वेभ्यो॑ जा॒तो नमो॑ रु॒चाय॒ ब्राह्म॑ये ॥४॥

रु॒चं ब्रा॒ह्मञ्ज॒नय॑न्तो दे॒वा अग्रे॑ त॒दब्रु॑वन् ।

यस्त्वै॒वं ब्रा॑ह्म॒णो वि॒द्यात्तस्य॑ दे॒वा अ॑स॒न्वशे॑ ॥५॥

श्रीश्च॑ ते ल॒क्ष्मीश्च॒ पत्न्या॑ अहोरा॒त्रे पा॒र्श्वे नक्ष॑त्राणि

रू॒पम॒श्विनौ॒ व्यात्त॑म् । इ॒ष्णन्नि॑षाणा॒मुं म॑ इषाण सर्वलो॒कं

म॑ इषाण ॥६॥२॥

तदे॒वाग्निस्तदा॑दि॒त्यस्तद्वा॒युस्तदु॑ च॒न्द्रमाः॑ ।

तदे॒व शु॒क्रन्तद्ब्रह्म॒ तदापः॒स्तत्प्र॒जाप॑तिः ॥१॥

सर्वे॑ नि॒मे॒षा ज॑ज्ञि॒रे वि॒द्युतः॒ प्पुरु॑षा॒दधि॑ ।

नैन॑मू॒र्ध्वन्न ति॒र्यञ्चन्न॒ मध्ये॒ परि॑ जग्र॒भत् ॥२॥

न तस्य प्रतिमा अस्ति यस्य नाम महद्यशः ।
हिरण्यगर्भ इत्येषः ॥३॥
एषो ह देवः प्रदिशोऽनु सर्वाः पूर्वो ह जातः स उ गर्भे अन्तः ।
स एव जातः स जनिष्यमाणः प्रत्यङ् जनास्तिष्ठति
सर्वतोमुखः । यस्मान्न जात इत्येषः ॥४॥
वेनस्तत्पश्यन्निहितङ्गुहा सद्यत्र विश्वं भवत्येकनीळम् ।
तस्मिन्निद९ सञ्च वि चैति सर्व९ स ओतः प्रोतश्च
विभूः प्रजासु ॥५॥
प्रतद्वोचेदमृतन्नु विद्वान्गन्धर्वो धाम विभृतङ्गुहा सत् ।
त्रीणि पदानि निहिता गुहास्य यस्तानि वेद स पितुः
प्पितासत् ॥६॥
स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा ।
यत्र देवा अमृतमानशानास्तृतीये धामन्नध्यैरयन्त ॥७॥

परीत्य भूतानि परीत्य लोकान्परीत्य सर्वाः प्रदिशो दिशश्च ।
उपस्थाय प्रथमजामृतस्यात्मनात्मानमभि सँ विवेश ॥८॥
परि द्यावापृथिवी सद्य इत्वा परि लोकान् परि दिशः प्परि स्वः ।
ऋतस्य तन्तुँ विततँ विचृत्य तदपश्यत्तदभवत्तदासीत् ॥९॥
सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् ।
सनिं मेधामयासिषꣳ स्वाहा ॥१०॥
यां मेधान्देवगणाः प्पितरश्चोपासते ।
तयामामद्य मेधयाग्ने मेधाविनङ्कुरु स्वाहा ॥११॥
इदं मे ब्रह्म च क्षत्रञ्चोभे श्रियमश्नुताम् ।
मयि देवा दधतु श्रियमुत्तमान्तस्यै ते स्वाहा ॥१२॥३॥

इति पुरुषसूक्तम् ॥

## अथ महाशान्तिसूक्तम् ॥

ऋचँ व्वाचं प्रपद्ये मनो यजुः प्प्रपद्ये साम प्राणं प्रपद्ये
चक्षुः श्रोत्रं प्रपद्ये । वागोजः सहोजो मयि प्राणापानौ ॥१॥
यन्मे च्छिद्रञ्चक्षुषो हृदयस्य मनसो वाति तृण्णं बृहस्पतिर्मे
तद्दधातु । शन्नो भवतु भुवनस्य यस्पतिः ॥२॥
भूर्भुवः स्वः । तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।
धियो यो नः प्रचोदयात् ॥३॥
कया नश्चित्र आ भुवदूती सदावृधः सखा ।
कया शचिष्ठया वृता ॥४॥
कस्त्वा सत्यो मदानां मꣳहिष्ठो मत्सदन्धसः ।
दृढ्ळा चिदारुजे वसु ॥५॥
अभी षु णः सखीनामविता जरितृणाम् ।
शतं भवास्यूतिभिः ॥६॥

कया त्वन्न ऊत्याभि प्र मन्दसे वृषन्। कया स्तोतृभ्य आ भर ॥७॥

इन्द्रो विश्वस्य राजति। शन्नो अस्तु द्विपदे शञ्चतुष्पदे ॥८॥

शन्नो मित्रः शँ व्वरुणः शन्नो भवत्वर्यमा।

शन्न इन्द्रो बृहस्पतिः शन्नो विष्णुरुरुक्रमः ॥९॥

शन्नो वातःप्पवता᳟ शन्नस्तपतु सूर्यः।

शन्नः क्कनिक्रदद्देवः प्पर्जन्यो अभि वर्षतु ॥१०॥

अहानि शं भवन्तु नः श᳟ रात्रिःप्प्रति धीयताम्।

श न्न इन्द्राग्नी भवतामवोभिः शन्न इन्द्रावरुणा रातहव्या।

शन्न इन्द्रापूषणा वाजसातौ शमिन्द्रासोमा सुविताय शँ य्योः ॥११॥

शन्नो देवीरभिष्टय आपो भवन्तु पीतये।

शँ य्योरभि स्रवन्तु नः ॥१२॥

स्योना पृथिवि नो भवानृक्षरा निवेशनी।

यच्छा नः शर्म सप्रथाः॥१३॥

आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन ।
महे रणाय चक्षसे ॥१४॥

यो वः शिवतमो रसस्तस्य भाजयतेह नः ।
उशतीरिव मातरः ॥१५॥

तस्मा अरङ्गमाम वो यस्य क्षयाय जिन्वथ ।
आपो जनयथा च नः॥१६॥

द्यौः शान्तिरन्तरिक्ष७ँ शान्तिः पृथिवी शान्तिरापः
शान्तिरोषधयः शान्तिः । वनस्पतयः शान्तिः शान्तिरेव
शान्तिः ॥१७॥

दृते दृ७ँह मा मित्रस्य मा चक्षुषा सर्वाणि भूतानि
समीक्षन्ताम् । मित्रस्याहञ्चक्षुषा सर्वाणि भूतानि समीक्षे ।
मित्रस्य चक्षुषा समीक्षामहे ॥१८॥

दृते दृ७ँह मा ।

ज्योक्ते सन्दृशि जीव्यासञ्ज्योक्ते सन्दृशि जीव्यासम् ॥१९॥
नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे । अन्याँस्ते
अस्मत्तपन्तु हेतयः प्पावको अस्मभ्यँ शिवो भव ॥२०॥
नमस्ते अस्तु विद्युते नमस्ते स्तनयित्नवे ।
नमस्ते भगवन्नस्तु यतः स्वः समीहसे ॥२१॥
यतो यतः समीहसे ततो नो अभयङ्कुरु ।
शन्नः कुरु प्रजाभ्योऽभयन्नः प्पशुभ्यः ॥२२॥
सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु ।
योऽस्मान्द्वेष्टि यञ्च वयन्द्विष्मः ॥२३॥
तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः
शतञ्जीवेम शरदः शतँ शृणुयाम शरदः शतम् ॥२४॥

इति महाशान्तिसूक्तम् ॥

## अथ ईशावास्योपनिषत् ॥

ॐ३ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥
ॐ१ शान्तिःशान्तिःशान्तिः॥

ईशावास्यमिद९ सर्वँ य्यत्किञ्च जगत्याञ्जगत् ।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद्धनं ॥१॥
कुर्वन्नेवेह कर्माणि जिजीविशेच्छत९ समाः ।
एवन्त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥२॥
असुर्या नाम ते लोका अन्धेन तमसावृताः ।
ता९स्ते प्रेत्याभि गच्छन्ति ये के चात्महनो जनाः ॥३॥
अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन् पूर्वमर्षत् ।
तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति ॥४॥
तदेजति तन्नेजति तद्दूरे तद्वन्तिके ।

तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः ॥५॥

यस्तु सर्वाणि भूतान्यात्मन्नेवानुपश्यति ।

सर्वभूतेषु चात्मानन्ततो न वि जुगुप्सते ॥६॥

यस्मिन्त्सर्वाणि भूतान्यात्मैवाभूद्विजानतः ।

तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥७॥

स पर्यगाच्छुक्रमकायमव्रणमस्नाविरꣳ शुद्धमपापविद्धम् ।

कविर्मनीषी परिभूः स्वयंभूर्याथातथ्यतोऽर्थान्

व्यदधाच्छाश्वतीभ्यः समाभ्यः ॥८॥

अन्धन्तमः प्र विशन्ति येऽविद्यामुपासते ।

ततो भूयइव ते तमो य उ विद्यायाꣳ रताः ॥९॥

अन्यदेवाहुर्विद्ययान्यदाहुरविद्यया ।

इति शुश्रुम धीराणाँ य्येनस्तद्विचचक्षिरे ॥१०॥

विद्याञ्चाविद्याञ्च यस्तद्वेदोभयꣳ सह ।

अविद्यया मृत्युन्तीर्त्वा विद्ययामृतमश्नुते ॥११॥

अन्धन्तमः प्र विशन्ति येऽसंभूतिमुपासते ।

ततो भूयइव ते तमो य उ संभूत्या॑ँ रताः ॥१२॥

अन्यदेवाहुः संभवादन्यदाहुरसंभवात् ।

इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥१३॥

संभूतिञ्च विनाशञ्च यस्तद्वेदोभय॑ँ सह ।

विनाशेन मृत्युन्तीर्त्वा संभूत्यामृतमश्नुते ॥१४॥

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।

तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ॥१५॥

पूषन्नेकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन्त्समूह तेजो

यत्ते रूपङ्कल्याणतमन्तत्ते पश्यामि ।

योऽसावसौ पुरुषस्सोऽहमस्मि ॥१६॥

वायुरनिलममृतमथेदं भस्मान्त॑ँ शरीरं ।

ॐ३ क्रतो स्मर कृत७ँ स्मर क्रतो स्मर कृत७ँ स्मर ॥१७॥

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् ।

युयोध्यस्मज्जुहुराणमेनो भूयिष्ठान्ते नमउक्तिं विधेम ॥१८॥

ॐ३ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।

पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।

ॐ३ शान्तिःशान्तिःशान्तिः॥

इति ईशावास्योपनिषत् ॥

## अथ विष्णुसूक्तम् ॥

युञ्जते मनं उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः ।
वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः ॥१॥

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ।
समूढमस्य पाꣳसुरे स्वाहा ॥२॥

इरावती धेनुमती हि भूतꣳ सूयवसिनी मनवे दशस्या । व्यस्कभ्ना
रोदसी विष्ण एते दाधर्थ पृथिवीमभितो मयूखैः स्वाहा ॥३॥

देवश्रुतौ देवेष्वा घोषतम् । प्राची प्रेतमध्वरङ्कल्पयन्ती
ऊर्ध्वँय्यज्ञन्नयतं मा जिह्वरतम् ॥४॥

स्वङ्गोष्ठमावदतन्देवी दुर्ये आयुर्मा निर्वादिष्टं प्रजां मा
निर्वादिष्टम् । अत्र रमेथाँ व्वर्ष्मन् पृथिव्याः ॥५॥

विष्णोर्नु कँ व्वीर्याणि प्रवोचँ य्यः प्पार्थिवानि विममे रजाꣳसि ।
यो अस्कभायदुत्तरꣳ सधस्थँ व्विचक्रमाणस्त्रेधोरुगायो

विष्णवे त्वा ॥६॥

दिवो वा विष्ण उत वा पृथिव्या महो वा विष्ण
उरोरन्तरिक्षात् । उभा हि हस्ता वसुना पृणस्वा प्र यच्छ
दक्षिणादोत सव्याद्विष्णवे त्वा ॥७॥

प्रतद्विष्णुस्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः ।
यस्योरेषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ॥८॥

विष्णो रराटमसि विष्णो ऽनप्त्रे स्थो विष्णो स्यूरसि
विष्णोर्ध्रुवोऽसि । वैष्णवमसि विष्णवे त्वा ॥९॥

इति विष्णुसूक्तम् ॥

## अग्निसूक्तम् ॥

ॐ समास्त्वाग्न ऋतवो वर्धयन्तु सँव्वत्सरा ऋषयो यानि सत्या।
सन्दिव्येन दीदिहि रोचनेन विश्वा आभाहि प्रदिशश्चतस्रः ॥१॥
सञ्चेध्यस्वाग्ने प्र च बोधयैनमुच्च तिष्ठ महते सौभगाय ।
मा च रिषदुपसत्ता ते अग्ने ब्रह्माणस्ते यशसस्सन्तु मान्ये ॥२॥
त्वामग्ने वृणते ब्राह्मणा इमे शिवो अग्ने सँ व्वरणे भवा नः।
सपत्नहा नो अभिमातिजिच्च स्वे गये जागृह्यप्रयुच्छन् ॥३॥
इहैवाग्ने अधि धारया रयिं म त्वा निक्रन् पूर्वचितो निकारिणः।
क्षत्रमग्ने सुयममस्तु तुभ्यमुपसत्ता वर्धतान्ते अनिष्टृतः ॥४॥
क्षत्रेणाग्ने स्वायुस्सꣳ रभस्व मित्रेणाग्ने मित्रधेये यतस्व ।
सजातानां मध्यमस्था एधि राज्ञामग्ने विहव्यो दीदिहीह ॥५॥
अति निहो अति स्रिधोऽत्यचित्तिमत्यरातिमग्ने ।
विश्वा ह्यग्ने दुरिता सहस्वाथास्मभ्यꣳ सहवीरꣳ रयिन्दाः ॥६।

अनाधृष्यो जातवेदा अनिष्टृतो विराळग्ने क्षत्रभृद्दीदिहीह ।
विश्वा आशाः प्रमुञ्चन्मानुषीर्भियः शिवेभिरद्य परि
पाहि नो वृधे ॥७॥

बृहस्पते सवितर्बोधयैन॒ꣳ सꣳशितञ्चित्सन्तरा॒ꣳ सꣳ शिशाधि।
वर्धयैनं महते सौभगाय विश्व एनमनुमदन्तु देवाः ॥८॥

अमुत्रभूयादथ यद्यमस्य बृहस्पते अभिशस्तेरमुञ्चः ।
प्रत्यौहतामश्विना मृत्युमस्माद्देवानामग्ने भिषजा शचीभिः ॥९॥

उद्वयन्तमसस्परि स्वः पश्यन्त उत्तरम् ।
देवन्देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥१०॥

इति अग्निसूक्तम् ॥

## अथ वात्सप्रसूक्तम् ॥

दिवस्परि प्रथमञ्जज्ञे अग्निरस्मद्द्वितीयं परि जातवेदाः ।
तृतीयमप्सु नृमणा अजस्रमिन्धान एनञ्जरते स्वाधीः ॥१॥
विद्मा ते अग्ने त्रेधा त्रयाणि विद्मा ते धाम विभृता पुरुत्रा ।
विद्मा ते नाम परमङ्गुहा यद्विद्मा तमुत्सँ य्यत आजगन्थ ॥२॥
समुद्रे त्वा नृमणा अप्स्वन्तर्नृचक्षा ईधे दिवो अग्न ऊधन् ।
तृतीयेत्वा रजसि तस्थिवाꣳसमपामुपस्थे महिषा अवर्द्धन् ॥३॥
अक्रन्ददग्नि स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन् ।
सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः॥४॥
श्रीणामुदारो धरुणो रयीणां मनीषाणां प्रार्पणः सोमगोपाः ।
वसुःसूनुः सहसो अप्सु राजा विभात्यग्र उषसामिधानः ॥५॥
विश्वस्य केतुर्भुवनस्य गर्भ आ रोदसी अपृणाज्जायमानः ।
वीळुञ्चिदद्रिमभिनत्परायञ्जना यदग्निमयजन्त पञ्च ॥६॥

उशिक्पावको अरतिः सुमेधा मर्तेष्वग्निरमृतो नि धायि ।
इयर्ति धूममरुषं भरिभ्रदुच्छुक्रेण शोचिषा द्यामिनक्षन् ॥७॥
दृशानो रुक्म उर्व्या व्यद्यौद्दुर्मर्षमायुः श्रिये रुचानः ।
अग्निरमृतो अभवद्वयोभिर्यदेनन्द्यौरजनयत्सुरेताः ॥८॥
यस्ते अद्य कृणवद्भद्रशोचेऽपूपन्देव घृतवन्तमग्ने ।
प्रतन्नय प्रतरँ वस्यो अच्छाभि सुम्नन्देवभक्तँ यविष्ठ ॥९॥
आ तं भज सौश्रवसेष्वग्न उक्थउक्थ आभज शस्यमाने ।
प्रियः सूर्ये प्रियो अग्ना भवात्युज्जातेन भिनददुज्जनित्वैः ॥१०॥
त्वामग्ने यजमाना अनु द्यून्विश्वा वसु दधिरे वार्याणी ।
त्वया सह द्रविणमिच्छमाना व्रजङ्गोमन्तमुशिजो विवव्रुः ॥११॥
अस्ताव्यग्निर्नराᳬ सुशेवो वैश्वानर ऋषिभिः सोमगोपाः ।
अद्वेशे द्यावापृथिवी हुवेम देवा धत्त रयिमस्मे सुवीरम् ॥१२॥

इतिवात्सप्रसूक्तम् ॥

## अथाग्निश्रवणमन्त्राः ॥

ॐ भूर्भुवः स्वः । तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।
धियो यो नः प्रचोदयात् ॥

कृणुष्व पाजः प्रसितिन्न पृथ्वीँ याहि राजेवामवाँ इभेन ।
तृष्वीमनु प्रसीतिन्द्रूणानोऽस्तासि विध्य रक्षसस्तपिष्ठैः ॥
तव भ्रमास आशुया पतन्त्यनु स्पृश धृषता शोशुचानः ।
तपूꣳष्यग्ने जुह्वा पतङ्गानसन्दितो विसृज विष्वगुल्काः ॥
प्रति स्पशो वि सृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धः।
यो नो दूरे अघशꣳसो यो अन्त्यग्ने माकिष्टे व्यथिरादधर्षीत् ॥
उदग्ने तिष्ठ प्रत्यातनुष्व न्यमित्राँ ओषतात्तिग्महेते ।
यो नो अरातिꣳ समिधान चक्रे नीचा तन्धक्ष्यतसन्न शुष्कम् ॥
ऊर्ध्वो भव प्रति विध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने ।
अव स्थिरा तनुहि यातुजानाञ्जामिमजामि प्र मृणीहि शत्रून् ॥

सुरावन्तं बर्हिषदꣳ सुवीरँ यज्ञꣳ हिन्वन्ति महिषा नमोभिः ।
दधानाः सोमन्दिवि देवतासु मदेमेन्द्रँ यजमानाः स्वर्काः ॥१॥
यस्ते रसः सम्भृत ओषधीषु सोमस्य शुष्मः सुरया सुतस्य ।
तेन जिन्व यजमानं मदेन सरस्वतीमश्विना इन्द्रमग्निम् ॥२॥
यमश्विना नमुचेरासुरादधि सरस्वत्यसुनोदिन्द्रियाय । इमन्तꣳ
शुक्रं मधुमन्तमिन्दुꣳ सोमꣳ राजानमिह भक्षयामि ॥३॥
यदत्र रिप्तꣳ रसिनः सुतस्य यदिन्द्रो अपिबच्छचीभिः ।
अहन्तदस्य मनसा शिवेन सोमꣳ राजानमिह भक्षयामि ॥४॥
पितृभ्यः स्वधायिभ्यः स्वधा नमः प्पितामहेभ्यः स्वधायिभ्यः
स्वधा नमः । प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः ॥५॥
अक्षन् पितरोऽमीमदन्त पितरोऽतीतृपन्त पितरः ।
पितरः शुन्धध्वम् ॥६॥
पुनन्तु मा पितरः सोम्यासः प्पुनन्तु मा पितामहाः प्पुनन्तु

प्रपितामहाः । पवित्रेण शतायुषा ॥७॥

पुनन्तु मा पितामहाः प्पुनन्तु प्रपितामहाः ।

पवित्रेण शतायुषा विश्वमायुर्व्यश्नवै ॥८॥

अग्न आयू८ंषि पवस आ सुवोर्जमिषञ्च नः ।

आरे बाधस्व दुच्छुनाम् ॥९॥

पुनन्तु मा देवजनाः प्पुनन्तु मनसा धियः ।

पुनन्तु विश्वा भूतानि जातवेदः प्पुनीहि मा ॥१०॥

पवित्रेण पुनीहि मा शुक्रेण देव दीद्यत् ।

अग्ने क्रत्वा क्रतू८ंरनु ॥११॥

यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा । ब्रह्म तेन पुनातु मा ॥१२॥

पवमानः सो अद्य नः प्पवित्रेण विचर्षणिः ।

यः प्पोता स पुनातु मा ॥१३॥

उभाभ्यान्देवसवितः प्पवित्रेण सवेन च । मां पुनीहि विश्वतः ॥१४॥

वैश्वदेवी पुनाती देव्यागाद्यस्यामिमा बह्व्यस्तन्वो वीतपृष्ठाः ।
तया मदन्तः सधमादेषु वयꣳ स्याम पतयो रयीणाम् ॥१५॥
ये समानाः समनसः पितरो यमराज्ये ।
तेषाँल्लोकः स्वधा नमो यज्ञो देवेषु कल्पताम् ॥१६॥
ये समानाः समनसो जीवा जीवेषु मामकाः । तेषाꣳ
श्रीर्मयि कल्पतामस्मिँल्लोके शतꣳ समाः ॥१७॥
द्वे सृती अशृणवं पितृणामहन्देवानामुत मर्त्यानाम् ।
ताभ्यामिदँ विश्वमेजत्समेति यदन्तरा पितरं मातरञ्च ॥१८॥
इदꣳ हविः प्रजननं मे अस्तु दशवीरꣳ सर्वगणꣳ स्वस्तये ।
आत्मसनि प्रजासनि पशुसनि लोकसन्यभयसनि ।
अग्निः प्रजां बहुलां मे करोत्वन्नं पयो रेतो अस्मासु धत्त ॥१९॥

उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः ।

असुँ य्य ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु ॥१॥

त्वꣳ सोम प्रचिकितो मनीषा त्वꣳ रजिष्ठमनु नेषि पन्थाम् ।

तव प्रणीती पितरो न इन्दो देवेषु रत्नमभजन्त धीराः ॥२॥

त्वया हि नः प्पितरः सोम पूर्वे कर्माणि चक्रुः प्पवमानधीराः।

वन्वन्नवातः प्परिधीꣳरपोर्णु वीरेभिरश्वैर्मघवा भवा नः ॥३॥

त्वꣳ सोम पितृभिः सँव्विदानोऽनु द्यावापृथिवी आ ततन्थ ।

तस्मै त इन्दो हविषा विधेम वयꣳ स्याम पतयो रयीणाम् ॥४॥

बर्हिषदः प्पितर ऊत्यर्वागिमा वो हव्या चकृमा जुषध्वम् ।

त आगतावसा शन्तमेनाथा नः शँ य्योररपो दधात ॥५॥

उपहूताः प्पितरः सोम्यासो बर्हिष्येषु निधिषु प्रियेषु ।

त आगमन्तु त इह श्रुवन्त्वधि ब्रुवन्तु तेऽवन्त्वस्मान् ॥६॥

आहं पितृन्त्सुविदत्राँ अवित्सि नपातञ्च विक्रमणञ्च विष्णोः।

बर्हिषदो ये स्वधया सुतस्य भजन्त पित्वस्त इहागमिष्ठाः ॥७।

अग्निष्वात्ताः प्पितर एह गच्छत सदःसदः सदत सुप्रणीतयः ।
अत्ता हवीꣳषि प्रयतानि बर्हिष्यथा रयिꣳ सर्ववीरन्दधातन ॥८॥
आयन्तु नः प्पितरः सोम्यासोऽग्निष्वात्ताः प्पथिभिर्देवयानैः ।
अस्मिन् यज्ञे स्वधया मदन्तोऽधि ब्रुवन्तु तेऽवन्त्वस्मान् ॥९॥
ये अग्निष्वात्ता ये अनग्निष्वात्ता मध्ये दिवः स्वधया मादयन्ते ।
तेभ्यः स्वराळसुनीतिमेताँ य्यथावशन्तन्वङ्कल्पयाति ॥१०॥
अग्निष्वात्तानृतुमतो हवामहे नाराशꣳसे सोमपीथँ य्य आशुः ।
ते नो विप्रासः सुहवा भवन्तु वयꣳ स्याम पतयो रयीणाम् ॥११॥
आच्या जानु दक्षिणतो निषद्येमँ य्यज्ञमभि गृणीत विश्वे ।
मा हिꣳसिष्ट पितरः केन चिन्नो यद्व आगः प्पुरुषता कराम ॥१२॥
आसीनासो अरुणीनामुपस्थे रयिन्धत्त दाशुषे मर्त्याय ।
पुत्रेभ्यः प्पितरस्तस्य वस्वः प्र यच्छत त इहोर्जन्दधात ॥१३॥
यमग्ने कव्यवाहन त्वञ्चिन्मन्यसे रयिम् ।

तन्नो गीर्भिः श्रवाय्यन्देवत्रा पनया युजम् ॥१४॥

यो अग्निः कव्यवाहनः पितॄन् यक्षदृतावृधः ।

प्रेदु हव्यानि वोचति देवेभ्यश्च पितृभ्य आ ॥१५॥

त्वमग्न ईळितो जातवेदोऽवाड्ढव्यानि सुरभीणि कृत्वी । प्रादाः

पितृभ्यः स्वधया ते अक्षन्नद्धि त्वन्देव प्रयता हवीᳪषि ॥१६॥

इदं पितृभ्यो नमो अस्त्वद्य ये पूर्वासो य उपरास ईयुः ।

ये पार्थिवे रजस्या निषत्ता ये वा नूनᳪ सुवृजनासु विक्षु ॥१७॥

ये चेह पितरो ये च नेह याᳪश्च विद्म याँ उ च न प्रविद्म ।

त्वँ वेत्थ यति ते जातवेदः स्वधाभिर्यज्ञᳪ सुकृतञ्जुषस्व ॥१८॥

अधा यथा नः पितरः परासः प्रत्नासो अग्न

ऋतमाशुषाणाः । शुचीदयन्दिधीतिमुक्थशासः क्षामा

भिन्दन्तो अरुणीरप व्रन् ॥१९॥

उशन्तस्त्वा नि धीमह्युशन्तः समिधीमहि ।

उशन्तुशत आवह पितॄन् हविषे अत्तवे ॥२०॥

अपां फेनेन नमुचेः शिर इन्द्रोदवर्तयः ।
विश्वा यदजय स्पृधः ॥२१॥

सोमो राजामृतᳬ सुत ऋजीषेणाजहान्मृत्युम् ।
ऋतेन सत्यमिन्द्रियं विपानᳬ शुक्रमन्धस
इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥१॥
अद्भ्यः क्षीरं व्यपिबत्कृङ्ङाङ्गिरसो धिया ।
ऋतेन सत्यमिन्द्रियं विपानᳬ शुक्रमन्धस
इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ।
सोममद्भ्यो व्यपिबच्छन्दसा हᳬसः शुचिषत् ।
ऋतेन सत्यमिन्द्रियं विपानᳬ शुक्रमन्धस
इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु । अन्नात्परिस्रुतो रसं

ब्रह्मणा व्यपिबत्क्षत्रं पयः सोमं प्रजापतिः ।
ऋतेन सत्यमिन्द्रियँ विपान ँ शुक्रमन्धस
इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥२॥
रेतो मूत्रँ विजहाति योनिं प्रविशदिन्द्रियम् ।
गर्भो जरायुणावृत उल्बञ्जहाति जन्मना ।
ऋतेन सत्यमिन्द्रियँ विपान ँ शुक्रमन्धस
इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥३॥
दृष्ट्वा रूपे व्याकरोत् सत्यानृते प्रजापतिः ।
अश्रद्धामनृते दधाच्छ्रद्धाँ सत्ये प्रजापतिः ।
ऋतेन सत्यमिन्द्रियँ विपान ँ शुक्रमन्धस
इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥४॥
वेदेन रूपे व्यपिबत्सुतासुतौ प्रजापतिः ।
ऋतेन सत्यमिन्द्रियँ विपान ँ शुक्रमन्धस

इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ।
दृष्ट्वा परिस्रुतो रसꣳ शुक्रेण शुक्रं व्यपिबत्पयः सोमं
प्रजापतिः । ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धस
इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥५॥

कः स्विदेकाकी चरति क उ स्विज्जायते पुनः ।
किꣳ स्विद्धिमस्य भेषजङ्किम्वावपनं महत् ॥१॥
सूर्य एकाकी चरति चन्द्रमा जायते पुनः ।
अग्निर्हिमस्य भेषजं भूमिरावपनं महत् ॥२॥
किꣳ स्वित् सूर्यसमञ्ज्योतिः किꣳ समुद्रसमꣳ सरः ।
किꣳ स्वित् पृथिव्यै वर्षीयः कस्य मात्रा न विद्यते ॥३॥
ब्रह्म सूर्यसमञ्ज्योतिर्द्यौः समुद्रसमꣳ सरः ।
इन्द्रः पृथिव्यै वर्षीयान् गोस्तु मात्रा न विद्यते ॥४॥

पृच्छामि त्वा चितये देवसख यदि त्वमत्र मनसा जगन्थ ।
येषु विष्णुस्त्रिषु पदेष्वेष्टस्तेषु विश्वं भुवनमा विवेशा३ ॥५॥
अपि तेषु त्रिषु पदेष्वस्मि येषु विश्वं भुवनमाविवेश ।
सद्यः पर्येमि पृथिवीमुत द्यामेकेनाङ्गेन दिवो अस्य पृष्ठम् ॥६॥
केष्वन्तः पुरुष आ विवेश कान्यन्तः पुरुषे अर्पितानि ।
एतद्ब्रह्मन्नुप वह्लामसि त्वा किꣳ स्विन्नः प्रति वोचास्यत्र ॥७॥
पञ्चस्वन्तः पुरुष आविवेश तान्यन्तः पुरुषे अर्पितानि ।
एतत्वात्र प्रतिमन्वानो अस्मि न मायया भवस्युत्तरो मत् ॥८॥

का स्विदासीत् पूर्वचित्तिः किꣳ स्विदासीद्बृहद्वयः ।
का स्विदासीत् पिलिप्पिला का स्विदासीत् पिशङ्गिला ॥१॥
द्यौरासीत् पूर्वचित्तिरश्व आसीद्बृहद्वयः ।
अविरासीत् पिलिप्पिला रात्रिरासीत् पिशङ्गिला ॥२॥

का ईमरे पिशङ्गिला का ईङ्कुरुपिशङ्गिला ।
क ईमास्कन्दमर्षति क ईं पन्थाँ व्विसर्पति ॥३॥
अजारे पिशङ्गिला श्वावित् कुरुपिशङ्गिला ।
शश आस्कन्दमर्षत्यहिः प्पन्थाँ व्वि सर्पति ॥४॥
कत्यस्य विष्ठाः कत्यक्षराणि कति होमासः कतिधा समिद्धः ।
यज्ञस्य त्वा विदथा पृच्छमत्र कति होतार ऋतुशो यजन्ति ॥५॥
षळस्य विष्ठाः शतमक्षराण्यशीतिर्होमाः समिधो ह तिस्रः ।
यज्ञस्य ते विदथा प्र ब्रवीमि सप्त होतार ऋतुषो यजन्ति ॥६॥
को अस्य वेद भुवनस्य नाभिङ्को द्यावापृथिवी अन्तरिक्षम् ।
कः सूर्यस्य वेद बृहतो जनित्रङ्को वेद चन्द्रमसँ य्यतोजाः ॥७॥
वेदाहमस्य भुवनस्य नाभिँ व्वेद द्यावापृथिवी अन्तरिक्षम् ।
वेद सूर्यस्य बृहतो जनित्रमथो वेद चन्द्रमसँ य्यतोजाः ॥८॥
पृच्छामि त्वा परमन्तं पृथिव्याः पृच्छामि यत्र भुवनस्य नाभिः ।

पृच्छामि त्वा वृष्णो अश्वस्य रेतः पृच्छामि वाचः प्परमँ व्व्योम ॥९॥

इयँ व्वेदिः प्परो अन्तः पृथिव्या अयँ य्यज्ञो भुवनस्य नाभिः ।

अय८ँ सोमो वृष्णो अश्वस्य रेतो ब्रह्मायँ व्वाचः प्परमँ व्व्योम ॥१०॥

सुभूः स्वयम्भूः प्प्रथमोऽन्तर्महत्यर्णवे ।

दधे ह गर्भमृत्वियँ य्यतो जातः प्प्रजापतिः ॥११॥

होता यक्षत्प्रजापति८ँ सोमस्य महिम्नः ।

जुषतां पिबतु सोम८ँ होतर्यज ॥१२॥

प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परि ता बभूव ।

यत्कामास्ते जुहुमस्तन्नो अस्तु वय८ँ स्याम पतयो रयीणाम् ॥१३॥

ॐआशुः शिशानो वृषभो न भीमो घनाघनः

क्षोभणश्चर्षणीनाम् । सङ्क्रन्दनोऽनिमिष एकवीरः शत८ँ

सेना अजयत्साकमिन्द्रः ॥१॥

सङ्क्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना ।
तदिन्द्रेण जयत तत्सहध्वँ य्युधो नर इषुहस्तेन वृष्णा ॥२॥
स इषुहस्तैः स निषङ्गिभिर्वशी सꣳस्रष्टा स युध इन्द्रो गणेन।
सꣳसृष्टजित् सोमपा बाहुशर्ध्युग्रधन्वा प्रतिहिताभिरस्ता ॥३॥
बृहस्पते परिदीया रथेन रक्षोहामित्राँ अपबाधमानः ।
प्रभञ्जन्त्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम् ॥४॥
बलविज्ञाय स्थविरः प्रवीरः सहस्वान्वाजी सहमान उग्रः ।
अभिवीरो अभिसत्वा सहोजा जैत्रमिन्द्र रथमा तिष्ठ गोवित् ॥५॥
गोत्रभिदङ्गोविदँ व्वज्रबाहुञ्जयन्तमज्म प्रमृणन्तमोजसा ।
इमꣳ सजाता अनु वीरयध्वमिन्द्रꣳ सखायो अनु सꣳरभध्वम् ॥६॥
अभि गोत्राणि सहसा गाहमानोऽदयो वीरः शतमन्युरिन्द्रः ।
दुश्च्यवनः पृतनाषाळ्युध्योऽस्माकꣳ सेना अवतु प्रयुत्सु ॥७॥
इन्द्र आसान्नेता बृहस्पतिर्दक्षिणा यज्ञः प्पुर एतु सोमः।

देवसेनानामभिभञ्जतीनाञ्जयन्तीनां मरुतो यन्त्वग्रम् ॥८॥

इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुता७ँ शर्धउग्रम् ।

महामनसां भुवनच्यवानाङ्घोषो देवानाञ्जयतामुदस्थात् ॥९॥

उद्धर्षय मघवन्नायुधान्युत्सत्वनां मामकानां मना७ँसि ।

उद्वृत्रहन्वाजिनाँ व्वाजिनान्युद्रथानाञ्जयताँ य्यन्तु घोषाः॥१०॥

अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकँ य्या इषवस्ता जयन्तु।

अस्माकँ व्वीरा उत्तरे भवन्त्वस्माँ उ देवा अवता हवेषु॥११॥

अमीषाञ्चित्तं प्रतिलोभयन्ती गृहाणाङ्गान्यप्वे परेहि ।

अभि प्रेहि निर्दह हृत्सु शोकैरन्धेनामित्रास्तमसा सचन्ताम् ॥१२॥

अवसृष्टा परापत शरव्ये ब्रह्म स७ँशिते ।

गच्छामित्रान् प्र पद्यस्व मामीषाङ्कञ्चनोच्छिषः ॥१३॥

प्रेता जयता नर इन्द्रो वः शर्म यच्छतु ।

उग्रा वः सन्तु बाहवोऽनाधृष्या यथासथ ॥१४॥

असौ या सेना मरुतः प्परेषामभ्यैति न ओजसा स्पर्धमाना ।
ताङ्गूहत तमसापव्रतेन यथामी अन्यो अन्यन्न जानन् ॥१५॥
यत्र बाणाः सपतन्ति कुमारा विशिखा इव । तत्र इन्द्रो
बृहस्पतिरदितिः शर्म यच्छतु विश्वाहा शर्म यच्छतु ॥१६॥
मर्माणि ते वर्मणा च्छादयामि सोमस्त्वा राजामृतेनानु
वस्ताम् । उरोर्वरीयो वरुणस्ते कृणोतु जयन्तन्त्वानु देवा
मदन्तु ॥१७॥

## अथ पूर्णाहुतिसूक्तम् ॥

ॐ पूर्णा दर्वि परा पत सुपूर्णा पुनरापत ।
वस्नेव वि क्रीणावहा इषमूर्ज॑ꣳ शतक्रतो ॥१॥
देहि मे ददामि ते नि मे धेहि नि ते दधौ ।
निहारन्नि हरामि ते निहारन्नि हरासि मे स्वाहा ॥२॥

ॐ सप्त ते अग्ने समिधःसप्त जिह्वाःसप्त ऋषयःसप्त
धाम प्रियाणि । सप्त होत्राः सप्तधा त्वा यजन्ति सप्त
योनीरापृणस्व घृतेन स्वाहा ॥

ॐ शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च
ज्योतिष्माꣳश्च । शुक्रश्च ऋतपाश्चात्यꣳहाः ॥१॥
ईदृङ्चान्यादृङ्च सदृङ्च प्रतिसदृङ्च ।
मितश्च सम्मितश्च सभराः ॥२॥
ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्च ।

अन्तिमित्रश्च दूरेअमित्रश्च गणः ॥३॥

ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च ।

धर्ता च विधर्ता च विधारयः ॥४॥

ईदृक्षास एतादृक्षास ऊषुणः सदृक्षासः प्रतिसदृक्षास एतन ।

मितासश्च सम्मितासो नो अद्य सभरसो मरुतो यज्ञे अस्मिन् ॥५॥

स्वतवाँश्च प्रघासी च सान्तपनश्च गृहमेधी च ।

क्रीळी च शाकी चोज्जेषी ॥६॥

इन्द्रन्दैवीर्विशो मरुतोऽनुवर्त्मानोऽभवन्यथेन्द्रन्दैवीर्विशो

मरुतोऽनुवर्त्मानोऽभवन् । एवमिमँ य्यजमानन्दैवीश्च

विशो मानुषीश्चानुवर्त्मानो भूयासुः ॥७॥

## अथ सूर्यसूक्तम् ॥

विभ्राड् बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपता अविह्रुतम् ।
वातजूतो यो अभिरक्षति त्मना प्रजाः प्पुपोष पुरुधा विराजति ॥१॥

उ दु त्यञ्जातवेदसन्देवँ व्वहन्ति केतवः ।
दृशे विश्वाय सूर्यम् ॥२॥

येना पावक चक्षसा भुरण्यन्तञ्जनाँ अनु ।
त्वँ व्वरुण पश्यसि ॥३॥

दैव्या अध्वर्यू आगतꣳ रथेन सूर्यत्वचा । मध्वा यज्ञꣳ
समञ्जाथे । तं प्रत्नथायँ व्वेनश्चोदयच्चित्रन्देवानाम् ॥४॥

आ न इळाभिर्विदथे सुशस्ति विश्वानरः सविता देव एतु ।
अपि यथा युवानो मत्सथा नो विश्वञ्जगदभिपित्वे मनीषा ॥५॥

यदद्य कच्च वृत्रहन्नुदगा अभि सूर्य । सर्वन्तदिन्द्र ते वशे ॥६॥

तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य ।

विश्वमा भासि रोचनम् ॥७॥

तत्सूर्यस्य देवत्वन्तन्महित्वं मध्या कर्त्तोर्विततॅं सञ्जभार ।

यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै ॥८॥

तन्मित्रस्य वरुणस्याभिचक्षे सूर्यो रूपङ्कृणुते द्योरुपस्थे ।

अनन्तमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितः संभरन्ति ॥९॥

बण्महाँ असि सूर्य बळादित्य महाँ असि ।

महस्ते सतो महिमा पनस्यतेऽद्धा देव महाँ असि ॥१०॥

बट् सूर्य श्रवसा महाँ असि सत्रा देव महाँ असि ।

मह्ना देवानामसुर्यः पुरोहितो विभु ज्योतिरदाभ्यम् ॥११॥

श्रायन्तइव सूर्यं विश्वेदिन्द्रस्य भक्षत ।

वसूनि जाते जनमान ओजसा प्रति भागन्न दीधिम ॥१२॥

अद्या देवा उदिता सूर्यस्य निरॅंहसः पिपृता निरवद्यात् ।

तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥१३॥

आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥१४॥
उद्वयं तमसस्परि स्वः पश्यन्त उत्तरम् ।
देवन्देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥१५॥

ॐ अदृश्रमस्य केतवो वि रश्मयो जनाँ अनु । भ्राजन्तो अग्नयो यथा । उपयामगृहीतोऽसि सूर्याय त्वा भ्राज एष ते योनिः सूर्याय त्वा भ्राजे । सूर्य भ्राजस्वन् भ्राजस्वाꣳस्त्वन्देवेष्वसि । भ्राजस्वानहं मनुष्येषु भूयासम् ॥
ॐउदुत्यञ्जातवेदसन्देवँ व्वहन्ति केतवः । दृशे विश्वाय सूर्यम् । उपयामगृहीतोऽसि सूर्याय त्वा भ्राज एष ते योनिः सूर्याय त्वा भ्राजे । सूर्य भ्राजस्वन् भ्राजस्वाꣳस्त्वन्देवेष्वसि । भ्राजस्वानहं मनुष्येषु भूयासम् ॥

चित्रन्देवानामुदगादनीकञ्चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आ प्रा द्यावापृथिवी अन्तरिक्षꣳसूर्य आत्मा जगतस्तस्थुषश्च ।
उपयामगृहीतोऽसि सूर्याय त्वा भ्राज एष ते योनिः सूर्याय
त्वा भ्राजे । सूर्य भ्राजस्वन् भ्राजस्वाꣳस्त्वन्देवेष्वसि ।
भ्राजस्वानहं मनुष्येषु भूयासम् ॥

ॐ मित्रस्य चर्षणीधृतोऽवो देवस्य सानसि ।
द्युम्नञ्चित्रश्रवस्तमम् ॥

ॐ हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता
वेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जा
गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥

ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः
शतञ्जीवेम शरदः शतꣳ शृणुयाम शरदः शतम् ॥

## अथाभ्यारोहजपः ॥

ॐ अथातः पवमानानामेवाभ्यारोहस्स वै खलु प्रस्तोता साम प्रस्तौति स यत्र प्रस्तुयात्तदेतानि जपेदसोतो मा सद्गमय तमसो मा ज्योतिर्गमय मृत्योर्माऽमृतङ्गमयेति स यदाहासतो मा सद्गमयेति मृत्युर्वा असत्सदमृतं मृत्योर्माऽमृतं गमयामृतं मा कुर्वित्येवैतदाह तमसो मा ज्योतिर्गमयेति मृत्युर्वै तमो ज्योतिरमृतं मृत्योर्माऽमृतं गमयाऽमृतं मा कुर्वित्येवैतदाह मृत्योर्माऽमृतङ्गमयेति नात्र तिरोहितमिवास्त्यथ यानीतराणि स्तोत्राणि तेष्वात्मनेऽन्नाद्यमागायेत्तस्मादु तेषु वरं वृणित यं कामङ्कामयेत त७ँ स एष एवं विदुद्गातात्मने वा यजमानाय वा यङ्कामङ्कामयते तमागायति तद्धैतल्लोकजिदेव नहैवाऽलोक्यताया आशास्ति य एवमेतत्साम वेद ॥

इत्यभ्यारोहजपः ॥

## अथ मण्डलब्राह्मणम् ॥

ॐ३ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ यदेतन्मण्डलं तपति तन्महदुक्थं ता ऋचस्स चाँल्लोकोऽथ यदेतदर्चिर्दीप्यते तन्महाव्रतं तानि सामानि स साम्नाँ ल्लोकोऽथ य एष एतस्मिन् मण्डले पुरुषस्सोऽग्नि स्तानि यजूꣳषि स यजुषाँल्लोकस्सैषा त्रय्येव विद्या तपति तद्धैतदप्यविद्वाꣳस आहुस्त्रयी वा एषा विद्या तपतीति वाग्घैव तत्पश्यन्ती वदति ॥१॥

स एष एव मृत्युर्य एष एतस्मिन्मण्डले पुरुषोऽथैत दमृतँय्यदेतदर्चिर्दीप्यते तस्मान्मृत्युर्न म्रियतेऽमृते ह्यन्तस्तस्माद्दु न दृश्यतेऽमृते ह्यन्तः ॥२॥

तदेष श्लोको भवत्यन्तरमृत्योरमृतमित्यवर७ह्येतन्मृत्योरमृतं मृत्यावमृत माहितमित्येतस्मिन्हि पुरुष एतन्मण्डलं प्रतिष्ठितं तपति मृत्युर्विवस्वन्तँव्वस्त इत्यसौ वा आदित्यो विवस्वानेष ह्यहोरात्रे विवस्ते तमेष वस्ते सर्वतो ह्येनेन परिवृतो मृत्योरात्मा विवस्वतीत्येतस्मिन्हि मण्डल एतस्य पुरुषस्यात्मै तदेष श्लोको भवति ॥३॥

तयोर्वा एतयोरुभयोरेतस्य चार्चिष एतस्य च पुरुषस्यैतन्मण्डलं प्रतिष्ठा तस्मान्महदुक्थं परस्मै न श७सेन्नेदेतां प्रतिष्ठां छिनदा इत्येता७्ह स प्रतिष्ठां छिन्ते यो महदुक्थं परस्मै श७सति तस्मादुक्थशसं भूयिष्ठं परिचक्षते प्रतिष्ठां च्छिन्नो हि भवतीत्यधिदेवतम् ॥४॥

अथाधियज्ञं यदेतन्मण्डलं तपत्ययं७ स रुक्मोऽथ यदेतदर्चिर्दीप्यत इदन्तत्पुष्करपर्णमापो ह्येता आपः

पुष्करपर्णमथ य एष एतस्मिन्मण्डले पुरुषोऽय मेव स योऽय७ँ हिरण्मयः पुरुषस्तदेतदेवैतत्रय७ँ स७ँस्कृत्यो होपधत्ते तद्यज्ञस्यैवानु स७ँस्थामूर्ध्वमुत्क्रामति तदेत मप्येति य एष तपति तस्मादग्निं नाद्रियेत परिहन्तुममुत्र ह्येष तदा भवतीत्यु एवाधियज्ञम् ॥५॥

अथाध्यात्मं यदेतन्मण्डलं तपति यश्चैष रुक्म इदंत च्छुक्ल मक्षन्नथ यदेतदर्चिर्दीप्यते यच्चैतत्पुष्कर पर्णमिदं तत्कृष्णमक्षन्नथ य एष एतस्मिन्मण्डले पुरुषो यश्चैष हिरण्मयः पुरुषोऽयमेव स योऽयं दक्षिणेऽक्षन्पुरुषः ॥६॥

स एष एव लोकम्पृणा तामेष सर्वोऽग्निरभि संपद्यते तस्यैतन्मिथुनं योऽय७ँ सव्योऽक्षन्पुरुषोऽर्ध मुहैतदात्मनो यन्मिथुनंय्यदा वै सह मिथुनेनाथ सर्वोऽथ कृत्स्नः कृत्स्नतायै तद्यत्ते द्वे भवतो द्वन्द्व७ँ हि मिथुनं

प्रजननं तस्माद्द्वे द्वे लोकम्पृणे उपधीयेते तस्मादु द्वाभ्यां द्वाभ्यां चितिं प्रणयन्ति ॥७॥

स एष एवेन्द्रो योऽयं दक्षिणेऽक्षन्पुरुषोऽथेयमिन्द्राणी ताभ्यान्देवा एताँ व्विधृति मकुर्वन्नासिकां तस्माज्जायाया अन्ते नाश्नीयाद्वीर्यवान् हास्माज्जायते वीर्यवन्तमुह सा जनयतियस्या अन्ते नाश्नाति ॥८॥

तदेतद्देवव्रतꣳ राजन्यबन्धवो मनुष्याणामनुतमाङ्गो पायन्ति तस्मादु तेषु वीर्यवाञ्जायतेऽमृतवाका वयसाꣳ साक्षिप्रश्येनं जनयति तौ हृदयस्या काशं प्रत्यवेत्य मिथुनी भवतस्तौ यदा मिथुनस्यान्तं गच्छतोऽथ हैतत्पुरुषः स्वपिति तद्यथा हैवेदं मानुषस्यमिथुनस्यान्तं गत्वाऽसंविद इव भवत्येवꣳ हैवैतदसँव्विद इव भवति दैवꣳह्येतन्मिथुनं परमो ह्येष आनन्दस्तस्मादेवँ व्वित्स्वप्याल्लोक्यꣳ हैते एव तद्देवते

मिथुनेन प्रियेण धाम्ना समर्धयति तस्मादु ह स्वपन्तं धुरेव न बोधयेन्नेदेते देवते मिथुनीभवन्त्यौ हिनसानीति तस्मादुहैतत्सुषुपुषः श्लेष्मणमिव मुखं भवत्येते एव तद्देवते रेतस्सिञ्चतस्तस्माद्रेतस इदᳪ सर्वᳪ संभवति यदिदं किं च ॥९॥

स एष एव मृत्युर्य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन् पुरुषस्तस्य हैनस्य हृदये पादावतिहितौ तौ हैत दाच्छिद्योत्क्रामति स यदोत्क्रामत्यथ हैतत्पुरुषो म्रियते तस्मादु हैतत्प्रेतमाहुराच्छेद्यस्येत्येष उ एव प्राण एष हीमास्सर्वाः प्रजाः प्रणयति तस्यैते प्राणास्स्वास्स यदा स्वपित्यथैनमेते प्राणास्स्वा अपियन्ति तस्मात्स्वाप्ययस्स्वाप्ययो ह वैतᳪ स्वप्न इत्याचक्षते परोक्षं परोक्षकामा हि देवाः ॥१०॥

स एतैस्सुप्तो न कस्यचन वेद न मनसा संकल्पयति

न वाचान्नस्य रसं विजानाति न प्राणेन गन्धं विजानाति न चक्षुषा पश्यति न श्रोत्रेण शृणोत्येतꣳह्येते तदाऽपीता भवन्ति स एष एकस्सन्प्रजासु बहुधा व्याविष्ट स्तस्मादेका सत लोकं सर्वमग्नि मनुविभव त्यथ यदेक एव तस्मादेका ॥११॥

त आहुरेको मृत्युर्बहवा३ इत्येकश्च बहवश्चेति ह ब्रूयाद्यदाहसावमुत्र तेनैकोऽथ यदिह प्रजासु बहुधा व्याविष्टस्तेनो बहवः ॥१२॥

तदाहुरन्तिके मृत्युर्दूरा३ इत्यन्तिके च दूरे चेति ह ब्रूयाद्यदहाय मिहाध्यात्मं तेनान्तिकेऽथ यदसावमुत्र तेन दूरे ॥१३॥

तदेष श्लोको भवत्यन्ने भात्यपश्रितो रसानाꣳ सङ्क्षरेऽमृत इति यदेतन्मण्डलं तपति तदन्नमथ य एष एतस्मिन्मण्डले पुरुषस्सोत्ता स एतस्मिन्नन्नेऽपरिश्रित

भातीत्यधिदेवतम् ॥१४॥

अथाध्यात्ममिदमेव शरीरमन्नमथ योऽयं दक्षिणेऽक्षन्पुरुषःसोऽत्ता स एतस्मिन्नन्नेऽपरिश्रितो भाति ॥१५॥

तमेतमग्निरित्यध्वर्यव उपासते यजुरित्येष हीद॑ सर्वं युनक्ति सामेति च्छन्दोगा एतस्मिन्हीद॑ सर्व॑ समानमुक्थमिति बह्वृचाएष हीद॑ सर्वमुत्थापयति यातुरिति यातुविद एतेन हीद॑ सर्वँय्यतँव्विष मिति सर्पास्सर्प इति सर्पविद ऊर्गिति देवा रयिरिति मनुष्या मायेत्यसुरास्स्वधेति पितरो देवजन इति देवजनविदो रूपमिति गन्धर्वा गन्ध इत्यप्सरसस्तँय्यथायथोपासते तदेव भवति तद्धैनान्भूत्वाऽवति तस्मादेनमेवँव्वित्सर्वैरेवैतैरुपासीत सर्व॑ हैतद्भवति सर्व॑ हैनमेतद्भूत्वाऽवति ॥१६॥

स एष त्रीष्टकोऽग्निर्ऋगेकायजुरेका सामैका तद्यां

कां चात्रर्चोप दधाति रुक्म एव तस्या आयतनमथ याँय्यजुषा पुरुष एव तस्या आयतनमथ या ँ सामनापुष्करपर्णमेव तस्यायतनमेवं त्रीष्टकस्ते वा एते उभे एष च रुक्म एतच्च पुष्करपर्णमेतं पुरुषमपीत उभे ह्यृक्सामे यजुरपीत एवम्वेकेष्टकः ॥१७॥

स एष एव मृत्युर्य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन् पुरुषस्स एष एवँव्विद आत्मा भवति स यदैवं विदस्माल्लोकात् प्रैत्यथैत मेवात्मान मभिसंभवति सोऽमृतो भवति मृत्युर्ह्यस्यात्मा भवति ॥१८॥

ॐ३ पूर्णमदः – शान्तिः ॥

इति काण्वशतपथब्राह्मणे अग्निरहस्यकाण्डे(१२)
पञ्चमाध्याये द्वितीयं ब्राह्मणम् ॥

इति मण्डलब्राह्मणम् ॥

## अथ भद्रसूक्तम् ॥

आ नो भद्राः क्क्रतवो यन्तु विश्वतोऽदब्धासो अपरीतास
उद्भिदः । देवा नो यथा सदमिद्वृधे असन्नप्रायुवो
रक्षितारो दिवेदिवे ॥१॥

देवानां भद्रा सुमतिरृजूयतान्देवाना॒ रातिरभि नो
निवर्त्तताम् । देवाना॒ सख्यमुप सेदिमा वयन्देवा न आयुः
प्र तिरन्तु जीवसे ॥२॥

तान्पूर्वया निविदा हूमहे वयं भगं मित्रमदितिन्दक्षमस्रिधम् ।
अर्यमणँ व्वरुण॒ सोममश्विना सरस्वती नः सुभगा
मयस्करत् ॥३॥

तन्नो वातो मयोभु वातु भेषजन्तन्माता पृथिवी तत्पिता द्यौः ।
तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतन्धिष्ण्या युवम् ॥४॥

तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसे हूमहे वयम् ।

पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥५॥

स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः प्पूषा विश्ववेदाः ।

स्वस्ति नस्ताक्ष्र्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥६॥

पृषदश्वा मरुतः पृश्निमातरः शुभँय्यावानो विदथेषु जग्मयः ।

अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसागमन्निह ॥७॥

भद्रङ्कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।

स्थिरैरङ्गैस्तुष्टुवाऽसस्तनूभिर्व्यशेम देवहितँ य्यदायुः ॥८॥

शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसन्तनूनाम् ।

पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ॥९॥

अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।

विश्वे देवा अदितिः प्पञ्च जना अदितिर्जातमदितिर्जनित्वम् ॥१०॥

इतिभद्रसूक्तम् ॥

## अथ शिवसङ्कल्पमन्त्राः ॥

ॐ यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति ।
दूरङ्गमञ्ज्योतिषां ज्योतिरेकं तन्मे मनः
शिवसङ्कल्पमस्तु ॥१॥

येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः।
यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु ॥२॥

यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु ।
यस्मान्न ऋते किञ्च न कर्म क्रियते तन्मे मनः
शिवसङ्कल्पमस्तु ॥३॥

येनेदं भूतं भुवनं भविष्यत्परिगृहीतममृतेन सर्वम् ।
येन यज्ञस्तायते सप्त होता तन्मे मनः शिवसङ्कल्पमस्तु ॥४॥

यस्मिन्नृचः साम यजूꣳषि यस्मिन्प्रतिष्ठिता
रथनाभाविवाराः ।

यस्मिꣳश्चित्तꣳसर्वमोतं प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु ॥५॥

सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिन इव ।

हृत्प्रतिष्ठं यदजिरं यविष्ठं तन्मे मनः शिवसङ्कल्पमस्तु ॥६॥

इति शिवसङ्कल्पमन्त्राः ॥

## महान्यासे श्रीरुद्रध्यानश्लोकाः ॥

१. सम्वर्त्ताग्निस्फटित्प्रदीप्तकनकप्रस्पर्द्धितेजोरुणम्
गम्भीरध्वनिसामवेदजनकं ताम्राधरं सुन्दरम् ।
अर्धेन्दुद्युतिलोलपिङ्गलजटाभारप्रबद्धोदकं
वन्दे सिद्धसुरासुरेन्द्रनमितं पूर्वमुखं शूलिनः ॥

२. कालाभ्रभ्रमराञ्जनद्युतिनिभं व्यावृत्तपिङ्गेक्षणम्
कर्णोद्भासितभोगिमस्तकमणि प्रोद्भिन्नदम्ष्टाङ्कुरम् ।
सर्पप्रोतकपालशुक्तिशकलव्याकीर्णताशेखरम्
वन्दे दक्षिणमीश्वरस्य वदनं चाथर्वनादोदयम् ॥

३. प्रालेयाचलमिन्दुकुन्दधवलं गोक्षीरफेनप्रभं
भस्माभ्यङ्गमनङ्गदेहदहनज्वालावलीलोचनम् ।

विष्णुब्रह्ममरुद्गणार्चितपदं चऋग्वेदनादोदयम्
वन्देहं सकलं कलङ्करहितं स्थाणोर्मुखं पश्चिमम् ॥

४. गौरं कुङ्कुमपङ्किलं सुतिलकं व्यापाण्डुगण्डस्थलं
भ्रूविक्षेपकटाक्षवीक्षणलसत्संसक्तकर्णोत्पलम् ।
स्निग्धं बिम्बफलाधरं प्रहसितं नीलालकालङ्कृतम्
वन्दे याजुषवेदघोषजनकं वक्त्रं हरस्योत्तरम् ॥

५. व्यक्ताव्यक्तनिरूपितञ्च परमं षट्त्रिंशत्तत्त्वाधिकं
तस्मादुत्तरतत्त्वमक्षरमिति ध्येयं सदा योगिभिः ।
ॐकारादिसमस्तमन्त्रजनकं सूक्ष्मातिसूक्ष्मं परं
वन्दे पञ्चममीश्वरस्य वदनं खव्यापि तेजोमयम् ॥

६. आपातालनभस्तलान्तभुवनब्रह्माण्डमाविस्फुरत्
ज्योतिस्फाटिकलिङ्गमौळिविलसत् पूर्णेन्दु वान्तामृतैः ।
अस्तोकाप्लुतमेकमीशमनिशं रुद्रानुवाकाञ्जपन्
ध्यायेदीप्सितसिद्धये ध्रुवपदं विप्रोऽभिषिञ्चेच्छिवम् ॥

७. पीठं यस्य धरित्री जलधरकलशं लिङ्गमाकाशमूर्तिं
नक्षत्र पुष्पमाल्यं ग्रहगणकुसुमं चन्द्रवह्न्यर्कनेत्रम् ।
कुक्षिः सप्तसमुद्रं हिमगिरिशिखरं सप्त पातालपादं
वेदं वक्त्रं षडङ्गं दशदिशिवसनं दिव्यलिङ्गं नमामि ॥

८. ब्रह्माण्डव्याप्तदेहा भसितहिमरुचा भासमानाभुजङ्गैः
कण्ठेकालाः कपर्दाः कलितशशिकलाश्चण्डकोदण्डहस्ताः ।
त्र्यक्षा रुद्राक्षमालाः प्रकटितविभवाः शाम्भवमूर्तिभेदाः
रुद्राः श्रीरुद्रसूक्तप्रकटितविभवाः नः प्रयच्छन्तु सौख्यम् ॥

इति महान्यासे श्रीरुद्रध्यानश्लोकाः

## अथ ओषधिसूक्तम् ॥

या ओषधीः प्पूर्वा जाता देवेभ्यस्त्रियुगं पुरा ।
मनै नु बभ्रूणामह९ शतन्धामानि सप्त च ॥१॥
शतं व्वो अम्ब धामानि सहस्रमुत वो रुहः ।
अधा शतक्रत्वो यूयमिमं मे अगदङ्कृत ॥२॥
ओषधीः प्रति गृभ्णीत पुष्पवतीः प्प्रसूवरीः ।
अश्वाइव सजित्वरीर्वीरुधः प्पारयिष्ण्वः ॥३॥
ओषधीरिति मातरस्तद्वो देवीरुप ब्रुवे ।

सनेयमश्वङ्गाँ व्वासं आत्मानन्त्तव पूरुष ॥४॥
अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता ।
गोभाज इत्किलासथ यत्सनवथ पूरुषम् ॥५॥
यत्रौषधीः समग्मत राजानः समिताइव ।
विप्रः स उच्यते भिषग्रक्षोहाऽमीवचातनः ॥६॥
अश्वावती९ सोमावतीमूर्जयन्तीमुदोजसम् ।
आवित्सि सर्वा ओषधीरस्मा अरिष्टतातये ॥७॥
उच्छुष्मा ओषधीनाङ्गावो गोष्ठादिवेरते ।
धन९ सनिष्यन्तीनामात्मानन्त्तव पूरुष ॥८॥
इष्कृतिर्नाम वो माताथो यूय९ स्थ निष्कृतीः ।
सिराः प्पतत्रिणी स्थन यदामयति निष्कृथ ॥९॥
अति विश्वाः प्परिष्ठा स्तेनइव व्व्रजमक्रमुः ।
ओषधीः प्प्राचुच्यवुर्यत्किञ्च तन्वो रपः ॥१०॥

यदिमा वाजयन्नहमोषधीर्हस्त आ दधे ।
आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा ॥११॥
यस्यौषधीः प्रसर्पथाङ्गमङ्गं परुष्परुः ।
ततो यक्ष्मँ विबाधध्व उग्रो मध्यमशीरिव ॥१२॥
साकँ यक्ष्म प्रपत चाषेण किकिदीविना ।
साकँ वातस्य ध्राज्या साकन्नश्य निहाकया ॥१३॥
अन्या वो अन्यामवत्वन्यान्यस्या उपावता ।
ताः सर्वाः सँविदाना इदं मे प्रावता वचः ॥१४॥
याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः ।
बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वꣳहसः ॥१५॥
मुञ्चन्तु मा शपथ्यादथो वरुण्यादुत ।
अथो यमस्य पड्वीशात् सर्वस्माद्देवकिल्बिशात् ॥१६॥
अवपतन्तीरवदन्दिव ओषधयस्परि ।

यञ्जीवमश्नवामहै न स रिष्याति पूरुषः ॥१७॥
या ओषधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः ।
तासामसि त्वमुत्तमारङ्कामाय शꣳ हृदे ॥१८॥
या ओषधीः सोमराज्ञीर्विष्ठिताः पृथिवीमनु ।
बृहस्पतिप्रसूता अस्यै सन्दत्त वीर्यम् ॥१९॥
याश्चेदमुपशृण्वन्ति याश्च दूरं परागताः ।
सर्वाः सङ्गत्य वीरुधोऽस्यै सन्दत्त वीर्यम् ॥२०॥
नाशयित्री बलासस्यार्शस उपचितामसि ।
अथो शतस्य यक्ष्माणां पाकारोरसि नाशनी ॥२१॥
मा वो रिषत्खनिता यस्मै चाहङ्खनामि वः ।
द्विपच्चतुष्पदस्माकꣳ सर्वमस्त्वनातुरम् ॥२२॥
ओषधयः सँ वदन्ते सोमेन सह राज्ञा ।
यस्मै कृणोति ब्राह्मणस्तꣳ राजन्पारयामसि ॥२३॥

त्वाङ्गन्धर्वा अखनꣳस्त्वामिन्द्रस्त्वां बृहस्पतिः ।
त्वामोषधे सोमो राजा विद्वान्यक्ष्मादमुच्यत ॥२४॥
त्वमुत्तमास्योषधे तव वृक्षा उपस्तयः ।
उपस्तिरस्तु सोऽस्माकँ य्यो अस्माँ अभिदासति ॥२५॥

इति ओषधिसूक्तम् ॥

## अथ राष्ट्रभृत्सूक्तम् ॥

अपो देवा मधुमतीरगृभ्णन्नूर्जस्वती रजस्वश्चितानाः ।
याभिर्मित्रावरुणा अभ्यषिञ्चन् याभिरिन्द्रमनयन्नत्यरातीः ॥१॥
वृष्ण ऊर्मिरसि राष्ट्रदा राष्ट्रं मे देहि स्वाहा वृष्ण ऊर्मिरसि
राष्ट्रदा राष्ट्रममुष्मै देहि । वृषसेनोऽसि राष्ट्रदा राष्ट्रं मे देहि
स्वाहा वृषसेनोऽसि राष्ट्रदा राष्ट्रममुष्मै देहि ॥२॥
अर्थेत स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहार्थेत स्थ राष्ट्रदा

राष्ट्रममुष्मै दत्त । ओजस्वती स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहौजस्वती स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त । आपः प्परिवाहिणी स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहापः प्परिवाहिणी स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त । अपां पतिरसि राष्ट्रदा राष्ट्रं मे देहि स्वाहापां पतिरसि राष्ट्रदा राष्ट्रममुष्मै देहि । अपाङ्गर्भोऽसि राष्ट्रदा राष्ट्रं मे देहि स्वाहापाङ्गर्भोऽसि राष्ट्रदा राष्ट्रममुष्मै देहि । सूर्यवर्चस स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा सूर्यवर्चस स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त । सूर्यत्वच स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा सूर्यत्वच स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त । व्रजक्षित स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा व्रजक्षित स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त । वाशा स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा वाशा स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त । मान्दा स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा मान्दा स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त ।

शक्वरी स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा शक्क्वरी स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त । जनभृत स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा जनभृत स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त । विश्वभृत स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा विश्वभृत स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त । शैष्ठा स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा शैष्ठा स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त । आपः स्वाराजी स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त ॥३॥

सं मधुमतीर्मधुमतीभिः पृच्यन्तां महि क्षत्रङ्क्षत्रियाय वन्वानाः । अनाधृष्टाः सीदत सहौजसा महि क्षत्रङ्क्षत्रियाय दधतीः ॥४॥

इति राष्ट्रभृत्सूक्तम् ॥

## अथ नवग्रहसूक्तम् ॥

आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥
त्र्यंबकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥
अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ॥
त्र्यंबकाधिदेवतायै अग्निप्रत्यधिदेवतायै आदित्याय नमः ॥१॥

इमन्देवा असपत्नꣳ सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय ।
इमममुममुष्य पुत्रममुष्याः पुत्रमस्यै विशे ॥
एषः वः कुरवो राजैष वः पञ्चाला राजा ।
सोमोऽस्माकं ब्राह्मणानाꣳ राजा ॥

श्रीश्च ते लक्ष्मीश्च पत्न्या अहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ

व्यात्तम् । इष्णन्निषाणामुम्म इषाण सर्वलोकं म इषाण ॥

आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन ।

महे रणाय चक्षसे ॥

**श्री अधिदेवतायै अप्प्रत्यधिदेवतायै सोमाय नमः ॥२॥**

अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् ।

अपाꣳ रेताꣳसि जिन्वति ॥

यदक्रन्दः प्रथमं जायमान उद्यन्त्समुद्रादुत वा पुरीषात् ।

श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महि जातन्ते अर्वन् ॥

भूम्या आखूनालभतेऽन्तरिक्षाय पाङ्क्त्रान् दिवे कशान् ।

दिग्भ्यो नकुलान्बभ्रुकानवान्तरदिशाभ्यः ॥

**स्कन्दाधिदेवतायै भूमिप्रत्यधिदेवतायै अङ्गारकाय नमः ॥३॥**

उद्बुध्यस्वाग्ने प्रति जागृहि त्वमिष्टापूर्ते सᳪसृजेथामयञ्च ।
अस्मिन्त्सधस्थे अध्युत्तरस्मिन्विश्वे देवा यजमानश्च सीदत ॥

विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजाᳪसि ।
यो अस्कभायदुत्तरᳪ सधस्थं विचक्रमाणस्त्रेधोरुगायो विष्णवे त्वा ॥
विष्णोरराटमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि
विष्णोर्ध्रुवोऽसि । वैष्णवमसि विष्णवे त्वा ॥

विष्ण्वधिदेवतायै विष्णुप्रत्यधिदेवतायै बुधाय नमः ॥४॥

बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु ।
यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणन्धेहि चित्रम् ॥

आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः ।
शूर इषव्योऽतिव्याधी महारथो जायताम् ॥

इन्द्रः पश्चादिन्द्रः पुरस्तादिन्द्रो अस्माँ अभि पातु विश्वतः ।

इन्द्रो जिघाᳬसतो मनाᳬसि विषूचीना व्यस्यतात् ॥

ब्रह्माधिदेवतायै इन्द्रप्रत्यधिदेवतायै बृहस्पतये नमः ॥५॥

अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिबत्क्षत्रं पयः सोमं प्रजापतिः ।

ऋतेन सत्यमिन्द्रियं विपानᳬ शुक्रमन्धस

इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु॥

सजोषा इन्द्र सगणो मरुद्भिः सोमं पिब वृत्रहा शूर विद्वान् ।

जहि शत्रूᳬरप मृधो नुदस्वाथाभयं कृणुहि विश्वतो नः ॥

इन्द्रन्नुरः कवष्यो धावमाना वृषाणं यन्तु जनयः सुपत्नीः ।

द्वारो देवीरभितो विश्रयन्ताᳬ सुवीरा वीरं प्रथमाना महोभिः ॥

इन्द्राधिदेवतायै इन्द्राणी प्रत्यधिदेवतायै भगवते शुक्राय नमः ॥६॥

शन्नो देवीरभिष्टय आपो भवन्तु पीतये ।

शं य्योरभि स्रवन्तु नः॥

यमाय त्वा मखाय त्वा सूर्यस्य त्वा तपसे ।
देवस्त्वा सविता मध्वानक्तु पृथिव्याः सᳪस्पृशस्पाहि ।
अर्चिरसि शोचिरसि तपोऽसि ॥
प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव ।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयᳪ स्याम पतयो रयीणाम् ॥
यमाधिदेवतायै प्रजापति प्रत्यधिदेवतायै शनैश्चराय नमः ॥७॥

काण्डात्काण्डात् प्ररोहन्ती परुषःपरुषस्परि ।
एवा नो दूर्वे प्रतनु सहस्रेण शतेन च ॥
कार्षिरसि समुद्रस्य त्वाक्षित्या उन्नयामि ।
समापो अद्भिरग्मत समोषधीभिरोषधीः ॥
नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु ।
ये अन्तरिक्षे ये दिवि तेभ्यस्सर्पेभ्यो नमः ॥
कालाधिदेवतायै सर्पप्रत्यधिदेवतायै राहवे नमः ॥८॥

केतुङ्कृण्वन्नकेतवे पेशो मर्या अपेशसे ।

समुषद्भिरजायथाः ॥

चित्रावसो स्वस्ति ते पारमशीय ।

सन्त्वमग्ने सूर्यस्य वर्चसागथाः समृषीणाꣳ स्तुतेन ॥

ब्रह्म जज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन आवः ।

स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥

चित्रगुप्ताधिदेवतायै ब्रह्मपत्यधिदेवतायै केतवे नमः ॥९॥

इतिनवग्रहसूक्तम् ॥

## अथ दिक्पालकमन्त्राः ॥

गणानान्त्वा गणपतिꣳ हवामहे प्रियाणान्त्वा प्रियपतिꣳ

हवामहे । निधीनान्त्वा निधिपतिꣳ हवामहे वसो मम ॥

महागणपतये नमः॥

श्रीश्च ते लक्ष्मीश्च पत्न्यौ अहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् । इष्णन्निषाणामुम्म इषाण सर्वलोकं म इषाण ॥

श्रियै नमः ॥

इन्द्रः पश्चादिन्द्रः पुरस्तादिन्द्रो अस्माँ अभि पातु विश्वतः । इन्द्रो जिघाᳬसतां मनाᳬसि विषूचीना व्यस्यतात् ॥ इन्द्राय नमः ॥

त्वन्नो अग्ने तव देव पायुभिर्मघोनो रक्ष तन्वश्च वन्द्य । त्राता तोकस्य तनये गवामस्यनिमेषᳬ रक्षमाणस्तव व्रते।

अग्नयेनमः ॥

सुगन्नु पन्थां प्रदिशन्न एहि ज्योतिष्मद्ध्येह्यजरन्न आयुः । अपैतु मृत्युरमृतन्न आगाद्वैवस्वतो नो अभयं कृणोतु ॥

यमाय नमः॥

असुन्वन्तमयजमानमिच्छ स्तेनस्येत्यामन्विहि तस्करस्य ।

अन्यमस्मदिच्छ सा त इत्या नमो देवि निरृते तुभ्यमस्तु ॥

**निरृतये नमः ॥**

तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः ।
अहेळमानो वरुणेह बोध्युरुश७ंसमा न आयुः प्रमोषीः ॥

**वरुणाय नमः ॥**

आ नो नियुद्भिः शतिनीभिरध्वर७ं सहस्रिणीभिरुप याहि
यज्ञम् । वायो अस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभिः सदा
नः ॥ **वायवे नमः ॥**

वय७ं सोम व्रते तव मनस्तनूषु बिभ्रतः । प्रजावन्तः
सचेमहि ॥ **सोमाय नमः ॥**

तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसे हूमहे
वयम् । पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः
स्वस्तये ॥ **ईशानाय नमः ॥**

अस्मे रुद्रा मेहना पर्वतासो वृत्रयत्ये भरहूतौ सजोषाः ।

यः शꣳसते स्तुवते धायि पज्र इन्द्रज्येष्ठा अस्माँ अवन्तु देवाः ॥

रुद्राय नमः ॥

स्योना पृथिवि नो भवानृक्षरा निवेशनी ।

यच्छा नः शर्म सप्रथाः ॥ पृथिव्यै नमः ॥

विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात् ।

संबाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन्देव एकः ॥

विश्वेभ्यो देवेभ्यो नमः ॥

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ।

समूढमस्य पाꣳसुरे स्वाहा ॥ महाविष्णवे नमः ॥

इति दिक्पालकमन्त्राः ॥

## अथ आदित्यहृदयम् ॥

ध्यानम्–

नमः सवित्रे जगदेकचक्षुषे
जगत्प्रसूति स्थितिनाशहेतवे ।
त्रयीमयाय त्रिगुणात्मधारिणे
विरिञ्चिनारायणशङ्करात्मने ॥

ततो युद्धपरिश्रान्तं समरे चिन्तया स्थितम् ।
रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थितम् ॥१॥
दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम् ।
उपागम्याब्रवीद्राममगस्त्यो भगवान् ऋषिः ॥२॥
राम राम महाबाहो शृणु गुह्यं सनातनम् ।
येन सर्वानरीन् वत्स समरे विजयिष्यसि ॥३॥
आदित्यहृदयं पुण्यं सर्वशत्रुविनाशनम् ।
जयावहं जपेन्नित्यमक्षय्यं परमं शिवम् ॥४॥
सर्वमंगळमाङ्गल्यं सर्वपापप्रणाशनम् ।
चिन्ताशोकप्रशमनं आयुर्वर्धनमुत्तमम् ॥५॥

रश्मिमन्तं समुद्यन्तं देवासुरनमस्कृतम् ।
पूजयस्व विवस्वन्तं भास्करं भुवनेश्वरम् ॥६॥
सर्वदेवात्मको ह्येष तेजस्वी रश्मिभावनः ।
एष देवासुरगणान् लोकान् पाति गभस्तिभिः ॥७॥
एष ब्रह्मा च विष्णुश्च शिव स्कन्दः प्रजापतिः ।
महेन्द्रो धनदः कालो यमः सोमो ह्यपांपतिः ॥८॥
पितरो वसवः साध्या ह्यश्विनौ मरुतो मनुः ।
वायुर्वह्निः प्रजाप्राणः ऋतुकर्ता प्रभाकरः ॥९॥
आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान् ।
सुवर्णसदृशो भानुः हिरण्यरेता दिवाकरः ॥१०॥
हरिदश्वः सहस्रार्चिः सप्तसप्तिर्मरीचिमान् ।
तिमिरोन्मथनः शम्भुस्त्वष्टा मार्ताण्डकोंऽशुमान् ॥११॥
हिरण्यगर्भः शिशिरस्तपनो भास्करो रविः ।
अग्निगर्भोऽदितेः पुत्रः शङ्खः शिशिरनाशनः ॥१२॥
व्योमनाथस्तमोभेदी ऋग्यजुःसामपारगः ।
घनवृष्टिरपांमित्रो विन्ध्यवीथीप्लवङ्गमः ॥१३॥
आतपी मण्डली मृत्युः पिङ्गळः सर्वतापनः ।

कविर्विश्वो महातेजाः रक्तः सर्वभवोद्भवः ॥१४॥

नक्षत्रग्रहताराणां अधिपो विश्वभावनः ।

तेजसामपि जेजस्वी द्वादशात्मन्नमोऽस्तु ते ॥१५॥

नमः पूर्वाय गिरये पश्चिमायाद्रये नमः ।

ज्योतिर्गणानां पतये दिनाधिपतये नमः ॥१६॥

जयाय जयभद्राय हर्यश्वाय नमो नमः ।

नमो नमः सहस्रांशो आदित्याय नमो नमः ॥१७॥

नम उग्राय वीराय सारङ्गाय नमो नमः ।

नमः पद्मप्रबोधाय मार्ताण्डाय नमो नमः ॥१८॥

ब्रह्मेशानाच्युतेशाय सूर्यायादित्यवर्चसे ।

भास्वते सर्वभक्षाय रौद्राय वपुषे नमः ॥१९॥

तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने ।

कृतघ्नघ्नाय देवाय ज्योतिषां पतये नमः ॥२०॥

तप्तचामीकराभाय वह्नये विश्वकर्मणे ।

नमस्तमोऽभिनिघ्नाय रुचये लोकसाक्षिणे ॥२१॥

नाशयत्येष वै भूतं तदेव सृजति प्रभुः ।

पायत्येष तपत्येष वर्षत्येष गभस्तिभिः ॥२२॥

एष सुप्तेषु जागर्ति भूतेषु परिनिष्ठितः ।
एष चैवाग्निहोत्रं च फलं चैवाग्निहोत्रिणाम् ॥२३॥
वेदाश्च क्रतवश्चैव क्रतूनां फलमेव च ।
यानि कृत्यानि लोकेषु सर्व एष रविः प्रभुः ॥२४॥

फलश्रुतिः –

एनमापत्सु कृच्छ्रेषु कान्तारेषु भयेषु च ।
कीर्तयन् पुरुषः कश्चिन्नावसीदति राघव ॥२५॥
पूजयस्वैनमेकाग्रो देवदेवं जगत्पतिम् ।
एतत्त्रिगुणितं जप्त्वा युद्धेषु विजयिष्यसि ॥२६॥
अस्मिन् क्षणे महाबाहो रावणं त्वं वधिष्यसि ।
एवमुक्त्वा तदागस्त्यो जगाम च यथागतम् ॥२७॥
एतच्छ्रुत्वा महातेजाः नष्टशोकोऽभवत्तदा ।
धारयामास सुप्रीतो राघवः प्रयतात्मवान् ॥२८॥
आदित्यं प्रेक्ष्य जप्त्वा तु परं हर्षमवाप्तवान् ।
त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्यवान् ॥२९॥
रावणं प्रेक्ष्य हृष्टात्मा युद्धाय समुपागमत् ।
सर्वयत्नेन महता वधे तस्य धृतोऽभवत् ॥३०॥

अथ रविरवदन्निरीक्ष्य रामं मुदितमनाः परमं प्रहृष्यमाणः ।
निशिचरपतिसंक्षयं विदित्वा सुरगणमध्यगतो वचस्त्वरेति ॥३१॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे
पञ्चाधिकशततमसर्गः ॥

## अथ आर्या द्वादशकम् ॥

उद्यन्नद्य विवस्वानारोहन्नुत्तरान्दिवन्देवः ।
हृद्रोगं मम सूर्यो हरिमाणं चाशु नाशय ॥ ह्रां मित्राय नमः ॥१॥
निमिषार्धेनैकेन द्वे च शते द्वे तथा सहस्रे च ।
क्रममाण योजनानां नमोऽस्तु ते नळिननाथाय ॥ ह्रीं रवये नमः ॥२॥
शिवरूपात् ज्ञानमहं त्वत्तो मुक्तिं जनार्दनाकारात् ।
शिखिरूपाच्चैश्वर्यं भवतश्चारोग्यमिच्छामि ॥ ह्रूं सूर्याय नमः ॥३॥
कर्मज्ञानखदशकं मनश्च जीव इति विश्वसर्गाय ।
द्वादशधा यो विचरति स द्वादशमूर्तिस्तु मुदे ॥ ह्रैं भानवे नमः ॥४॥
त्वं यजुरृक्साम त्वमागमस्त्वं वषट्कारः ।
त्वं विश्वस्त्वं हंसस्त्वं भानुः परमहंसश्च ॥ ह्रौं खगाय नमः ॥५॥
त्वचि दोषा दृशि दोषा हृदि दोषा येऽखिलेन्द्रियदोषाः ।

तान्पूषा हतदोषानीषद्रोषाग्निना दहतु ॥ ह्रः पूष्णे नमः ॥६॥

तिमिरमिव नेत्रतिमिरं पटलमिवाऽशेषरोगपटलं च ।

काचमिव धीनिकोचं कालपिता मम निराकुर्यात् ॥

ह्रां हिरण्यगर्भाय नमः ॥७॥

धर्मार्थकाममोक्षप्रतिरोधिन उग्रवेगतापकरान् ।

मन्दीकृतेन्द्रियगणानादान्विनाशयतु चण्डांशुः॥ ह्रीं मरीचये नमः ॥८॥

येन विनान्धन्तिमिरं जगदेतद्यत्र सति धृतबोधं ।

तत्रव्थिनीभर्तारं हर्तारं चापदामीडे ॥ ह्रूं आदित्याय नमः ॥९॥

यस्य सहस्राभीशोरभीशुलेशो हिमांशुबिंबगतः ।

भासयति नक्तमखिलं खिलयतु स विपद्गणानखिलान् ॥

ह्रैं सवित्रे नमः ॥१०॥

वाताश्मरि दुर्नामत्वग्दोषमहोदरप्रमेहांश्च ।

ग्रहिणीभगन्दरमुखान्महारुजोऽपि त्वमिन हरसि ॥

ह्रौं अर्काय नमः ॥११॥

त्वं शरणं त्वं माता त्वं च पिता त्वं धनं त्वमाचार्यः ।

त्वं त्राता त्वं हर्ता विपदामर्क प्रसीद मम ॥

ह्रः भास्कराय नमः ॥१२॥

इत्यार्याद्वादशकं सांबस्य पुरो नभस्तलात्पतितम् ।
पठतां भाग्यसमृद्धिस्सर्वगरोगक्षयश्च स्यात् ॥१३॥
छायादेवीसंज्ञादेवीसमेतश्री सूर्यनारायणस्वामिने नमः।
ॐ नमो नारायणाय ।
मित्र रविसूर्यभानु खग पूष हिरण्यगर्भमरीच्यादित्य
सवित्रर्क भास्करेभ्यो नमो नमः ॥

इतिआर्या द्वादशकम् ॥

## श्री याज्ञवल्क्योपदिष्टं सूर्यकवचम् ॥

याज्ञवल्क्य उवाच –

शृणुष्व मुनिशार्दूल सूर्यस्य कवचं शुभम् ।
शरीरारोग्यदं दिव्यं सर्वसौभाग्यदायकम् ॥१॥
देदीप्यमानमकुटं स्फुरन्मकरकुण्डलम् ।
ध्यत्वा सहस्रकिरणं स्तोत्रमेतदुदीरयेत् ॥२॥
शिरो मे भास्करः पातु ललाटं मेऽमितद्युतिः ।
नेत्रे दिनमणिः पातु श्रवणौव्वासरेश्वरः ॥३॥
घ्राणं घर्ममणिः पातु वदनँवेदवाहनः ।
जिह्वां मे मानदः पातु कण्ठं मे सुरवन्दितः ॥४॥

स्कन्धौ प्रभाकरः पातु वक्षः पातु जनप्रियः ।
पातु पादौ द्वादशात्मा सर्वाङ्गं सकलेश्वरः ॥५॥
सूर्यरक्षात्मकं स्तोत्रं लिखित्वा भूर्जपत्रके ।
दधाति यः करे तस्य वशगास्सर्वसिद्धयः ॥६॥
सुस्नातो यो जपेत्सम्यग्योऽधीते स्वस्थमानसः ।
स रोगमुक्तो दीर्घायुस्सुखं पुष्टिं च विन्दति ॥७॥
इति श्री याज्ञवल्क्योपदिष्टं सूर्यकवचम् ॥

## अथ श्रीसूक्तम् ॥

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥१॥
तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यंविन्देयं गामश्वं पुरुषानहम् ॥२॥
अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम् ।
श्रियन्देवीमुपह्वये श्रीर्मा देवी जुषताम् ॥३॥
कांसोस्मितां हिरण्यप्रकारामार्द्रां ज्वलन्तीं तृप्तान्तर्पयन्तीम् ।
पद्मे स्थितां पद्मवर्णान्तामिहोपह्वये श्रियम् ॥४॥
चन्द्रां प्रभासांय्यशसा ज्वलन्तीं श्रियँ ल्लोके देवजुष्टामुदाराम् ।
तां पद्मिनीमीं शरणमहं प्रपद्येऽलक्षीर्मे नश्यतां त्वां वृणे ॥५॥
आदित्यवर्णे तपसोऽधि जातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।
तस्य फलानि तपसा नुदन्तु मायान्तरायाश्च बाह्या अलक्ष्मीः ॥६॥
उपैतु मान्देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन्कीर्तिमृद्धिं ददातु मे ॥७॥
क्षुत्पिपासामलाञ्ज्येष्ठामलक्षीन्नाशयाम्यहम् ।
अभूतिमसमृद्धिं च सर्वान्निर्णुद मे गृहात् ॥८॥
गन्धद्वारान्दुराधर्षं नित्यपुष्टाङ्करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥९॥
मनसः काममाकूतिं व्वाचः सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीश्श्रयतां य्यशः ॥१०॥
कर्दमेन प्रजा भूता मयि संभव कर्दम ।
श्रियँव्वासय मे कुले मातरं पद्ममालिनीम् ॥११॥

आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे ।
नि च देवीं मातरं श्रियँ व्वासय मे कुले ॥१२॥
आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्मयीँ ल्लक्ष्मीं जातवेदो म आवह ॥१३॥
आर्द्रां यः करिणीँ य्यष्टिं पिङ्गलां पद्ममालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥१४॥
तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान् विन्देयं पुरुषानहम् ॥१५॥

श्रीसूक्तफलश्रुतिः ।

यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।
श्रियः पञ्चदशर्चं च श्रीकामस्सततं जपेत् ॥
पद्मासने पद्मऊरू पद्माक्षी पद्मसंभवे ।
त्वं मां भजस्व पद्माक्षि येन सौख्यँल्लभाम्यहम् ॥
अश्वदायी गोदायी धनदायी महाधने ।
धनं मे जुषतां देवि सर्वकामार्थसिद्धये ॥
पुत्रपौत्रधनं धान्यं हस्त्यश्वादि गवे रथम् ।
प्रजानां भवसि माता आयुष्मन्तं करोतु माम् ॥
चन्द्रभां लक्ष्मीमीशानां सूर्याभां श्रियमैश्वरीम् ।
चन्द्रसूर्याग्निवर्णाभां महालक्ष्मीमुपास्महे ॥
धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः ।
धनमिन्द्रो बृहस्परिर्वरुणं धनमश्नुते ॥
वैनतेय सोमं पिब सोमं पिबतु वृत्रहा ।
सोमं धनस्य सोमिनो मह्यं ददातु सोमिनी ॥

न क्रोधो न च मात्सर्यं न लोभो नाशुभामतिः ।
भवन्ति कृतपुण्यानां भक्तानां श्रीसूक्तं जपेत्सदा ॥
वर्षन्तु ते विभावरी दिवो अभ्रस्य विद्युतः ।
रोहन्तु सर्वबीजान्युप ब्रह्मद्विषो जहि ॥
पद्मप्रिये पद्मिनि पद्महस्ते पद्मालये पद्मदलायताक्षि ।
विश्वप्रिये विश्वमनोनुकूले त्वत्पादपद्मं मयि सन्निधत्स्व ॥
महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहि ।
तन्नो लक्ष्मीः प्रचोदयात् ॥
या सा पद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी
गंभीरावर्तनाभिः स्तनभरनमिता शुभ्रवस्त्रोत्तरीया ।
लक्ष्मीर्दिव्यैर्गजेन्द्रैर्मणिगणखचितैः स्नापिता हेमकुंभैः
नित्यं सा पद्महस्ता मम वसतु गृहे सर्वमाङ्गल्ययुक्ता ॥
सिद्धलक्ष्मीर्मोक्षलक्ष्मीर्जयलक्ष्मीः सरस्वती ।
श्रीर्लक्ष्मीर्वरलक्ष्मीश्च प्रसन्ना भव सर्वदा ॥
वराङ्कुशौ पाशमभीतिमुद्रां करैर्वहन्तीं कमलासनस्थाम् ।
बालार्ककोटि प्रतिभां त्रिणेत्रां भजेहमाद्यां जगदीश्वरीं ताम् ॥
सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधके ।
शरण्ये त्र्यंबके देवि नारायणि नमोऽस्तु ते ॥
श्रीर्वर्चस्यमायुष्यमारोग्यमाविधाच्छोभमानं महीयते ।
धान्यं धनं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥
इति श्रीसूक्तफलश्रुतिः ॥

## अथ दुर्गासूक्तम् ॥

ॐ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुन्दुरितात्यग्निः ॥
तामग्निवर्णान्तपसा ज्वलन्तीँव्वैरोचनीं कर्मफलेषु जुष्टाम् ।
दुर्गां देवी॑ शरणमहं प्रपद्ये सुतरसितरसे नमः ।
अग्ने त्वं पारया नव्यो अस्मान् स्वस्तिभिरतिदुर्गाणि विश्वा ॥
पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शँय्योः ।
विश्वानि नो दुर्गहा जातवेदः सिन्धुन्न नावा दुरितातिपर्षि ॥
अग्ने अत्रिवन्मनसा गृणानोऽस्माकं बोध्यविता तनूनाम् ।
पृतनाजित॑ सहमानमुग्रमग्नि॑ हुवेम परमात्सधस्थात् ।
स नः पर्षदति दुर्गाणि विश्वा क्षामद्देवो अति दुरितात्यग्निः ।
प्रत्नोषिकमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि ।
स्वां चाग्ने तनुवं पिप्रयस्वास्मभ्यञ्च सौभगमायजस्व ।
गोभिर्जुष्टमयुजो निषिक्तं तवेन्द्र विष्णोरनुसञ्चरेम ।
नाकस्य पृष्टमभिसँव्वसानो वैष्णवीँल्लोकमिह मादयन्ताम् ॥

कात्यायनाय विद्महे कन्यकुमारि धीमहि ।
तन्नो दुर्गिः प्रचोदयात् ॥

इतिदुर्गासूक्तम् ॥

## सरस्वतीसूक्तम् ॥

अश्विना तेजसा चक्षुः प्राणेन सरस्वती वीर्यम् ।
वाचेन्द्रो बलेनेन्द्राय दधुरिन्द्रियम् ॥१॥
गोमदूषु णासत्याश्वावद्यातमश्विना ।
वर्ती रुद्रा नृपाय्यम् ॥२॥
न यत्परो नान्तर आदधर्षद्वृषण्वसू ।
दुःशꣳसो मर्त्यो रिपुः ॥३॥
ता न आवोहळमश्विना रयिं पिशङ्गसन्दृशम् ।
धिष्ण्या वरिवोविदम् ॥४॥
पावका नः सरस्वती वाजेभिर्वाजिनीवती ।
यज्ञँ वष्टु धियावसुः ॥५॥
चोदयित्री सूनृतानाञ्चेतन्ती सुमतीनाम् ।
यज्ञन्दधे सरस्वती ॥६॥

महो अर्णः सरस्वती प्र चेतयति केतुना ।
धियो विश्वा विराजति ॥७॥

इन्द्रा याहि चित्रभानो सुता इमे त्वायवः ।
अण्वीभिस्तना पूतासः ॥८॥

इन्द्रा याहि धियेषितो विप्रजूतः सुतावतः ।
उप ब्रह्माणि वाघतः ॥९॥

इन्द्रा याहि तूतुजान उप ब्रह्माणि हरिवः ।
सुते दधिष्व नश्चनः ॥१०॥

अश्विना पिबतां मधु सरस्वत्या सजोषसा ।
इन्द्रः सुत्रामा वृत्रहा जुषन्ताᳪ सोम्यं मधु ॥११॥

॥ श्री महा सरस्वत्यै नमः ॥

**अशनि निवारणमन्त्रः ।**

शिवा नो वर्षास्सन्तु शिवा नस्सन्तु हेतयः ।
शिवा नस्तास्सन्तु यास्त्वꣳ सृजति वृत्रहन् ॥
अर्जुनः फल्गुनः पार्थः किरीटी श्वेतवाहनः ।
बीभसुर्विजयः कृष्णस्सव्यसाची धनञ्जयः ॥

**इति अशनिनिवारण मन्त्रः ॥**

**स्वापकाले जप्यमन्त्रः ॥**

अपसर्प सर्प भद्रं ते दूरं गच्छ महाविष ।
जनमेजययज्ञान्ते चास्तीकवचनं स्मरन् ॥
जरत्कारोर्जरत्कार्वां समुत्पन्नो महायशाः ।
अस्तीकस्सत्यसन्धो मां पन्नगेभ्योऽभिरक्षतु ॥

**इति स्वापकाले जप्यमन्त्रः ॥**

## अथायुष्यसूक्तम् ॥

आयुष्टे विश्वतो दधदयमग्निर्वरेण्यः ।
पुनस्ते प्राण आयाति परायक्ष्मꣳ सुवाति नः ॥
आयुष्मानग्ने हविषा वृधानो घृतप्रतीको घृतयोनिरेधि ।
घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभिरक्षतादिमान् ॥

इति पुरोऽनुवाक्यायाज्ये ॥

यो ब्रह्मा ब्रह्मण उज्जहार प्राणैश्शिरः कृत्तिवासाः पिनाकी ।
ईशानो देवस्स न आयुर्दधातु तस्मै जुहोमि हविषा घृतेन ॥१॥
विभ्राजमानस्सरिरस्य मध्याद्रोचमानो घर्मरुचिर्न आगात् ।
स मृत्युपाशादपनुद्य घोरादिहायुषे नो घृतमत्तु देवः ॥२॥
ब्रह्मज्योतिर्ब्रह्मपत्नीषु गर्भँय्यमादधात्पुरुरूपञ्जयन्तम् ।
सुवर्णरंभग्रहमर्कमर्च्यं तमायुषे वर्धमानो घृतेन ॥३॥
श्रियँल्लक्ष्मीमौवलामंबिकां गां षष्ठीञ्जयामिन्द्रसेनेत्युदाहुः ।
तां विद्यां ब्रह्मयोनिꣳ सरूपामिहायुषे तर्पयामो घृतेन ॥४॥
दाक्षायण्यस्सर्वयोन्यस्सयोन्यस्सहस्रशो विश्वरूपा विरूपाः ।

ससूनवस्स्सपतयस्स्ससूथ्या आयुषे नो घृतमिदं जुषन्ताम् ॥५॥

दिव्या गणा बहुरूपाः पुराणा आयुश्छिदो नः प्रमथ्नन्तु वीरान् ।

तेभ्यो जुहोमि बहुधा घृतेन मा नः प्राजाँ रीरिषो मोत वीरान्॥६॥

एकः पुरस्ताद्य इदं बभूव यतो बभूव भुवनस्य गोपाः ।

यमप्येति भुवनँ सांपराये स नो हविर्घृतमिहायुषेऽत्तु देवः ॥७॥

वसून्रुद्रानादियान्मरुतोऽथ साध्यानृभून्यक्षान्गन्धर्वाँश्च पितृँश्च

विश्वान् । भृगून्त्सर्पाँश्चाङ्गिरसोऽथ सर्वान् घृतँ हुत्वा

स्वायुष्यामहयाम शश्वत् ॥८॥

विष्णो त्वं नो अन्तमश्शर्म यच्छ सहन्त्य ।

प्रते धारा मधुश्चुत उत्सं दुह्रते अक्षितम् ॥

इति आयुष्यसूक्तम् ॥

## अथ प्रातःस्मरणम् ॥

ब्रह्मा मुरारिस्त्रिपुरान्तकश्च भानुश्शशी भूमिसुतो बुधश्च ।
गुरुश्च शुक्रः शनिराहुकेतवः कुर्वन्तु सर्वे मम सुप्रभातम् ॥
भृगुर्वसिष्ठः क्रतुरङ्गिराश्च मनुः पुलस्त्यः पुलहश्च गौतमः ।
रैभ्यो मरीचिश्च्यवनोऽथ दक्षः कुर्वन्तु सर्वे मम सुप्रभातम् ॥
सनत्कुमारश्च सनन्दनश्च सनातनोऽप्यासुरिसिंहळौ च ।
सप्त स्वराः सप्त रसातलानि कुर्वन्तु सर्वे मम सुप्रभातम् ॥
सप्तार्णवास्सप्त कुलाचलाश्च सप्तर्षयो द्वीपवनानि सप्त ।
भूरादिलोका भुवनानि सप्त कुर्वन्तु सर्वे मम सुप्रभातम् ॥
महाभारतमाख्यानं क्षितिं गां च सरस्वतीम् ।
ब्राह्मणान्केशवं चैव प्रातरुत्थाय कीर्तयेत् ॥
ब्रह्माणं शङ्करं विष्णुं यमं रामं दनुं बलिम् ।
सप्तैतान्संस्मरेन्नित्यं महापातकनाशनम् ॥
कौसल्या सुप्रजा राम पूर्वा सन्ध्या प्रवर्तते ।
उत्तिष्ठ नरशार्दूल कर्तव्यं देवमाह्निकम् ॥

प्रह्लादनारदपराशरपुण्डरीक व्यासाम्बरीषशुक शौनकभीष्मदाल्भ्यम्।
रुक्माङ्गदार्जुनवसिष्ठविभीषणादीन्पुण्यानिमान्परमभागवतान्स्मरामि ॥

पुण्यश्लोको नळो राजा पुण्यश्लोको युधिष्ठिरः ।
पुण्यश्लोको हरिश्चन्द्रः पुण्यश्लोकः पुरूरवाः ।
पुण्यश्लोका च वैदेही पुण्यश्लोको जनार्दनः ।
कर्कोटकस्य नागस्य दमयन्त्या नळस्य च ।
ऋतुपर्णस्य राजर्षेः कीर्तनं कलिनाशनम् ॥
कीर्तनं पापनाशनम् । कीर्यनं पुण्यवर्धनम् ।
कीर्तनं आयुष्यवर्धनम् ॥

अग्नित्रयं त्रीणि च पुष्कराणि नामत्रयं त्रीणि पदानि विष्णोः ।
रुद्रस्त्रिणेत्रस्त्रिपथा च गङ्गा एतानि दुस्स्वप्नविनाशनानि ॥

गङ्गाया दक्षिणे भागे योजनानां शतद्वये ।
पञ्चयोजनमात्रेण पूर्वाम्बोधेस्तु पश्चिमे ॥
वेगवत्त्युत्तरे तीरे पुण्यकोट्यां हरिः स्वयम् ।
वरदः सर्वभूतानामद्यापि परिदृश्यते ॥

वपापरिमळोल्लासवासिताधरपल्लवम् ।
मुखं वरदराजस्य मुग्धस्मितमुपास्महे ॥

भक्ताभीष्टफलप्रदाङ्घ्रियुगळं कौशेयराजत्कटि
लक्ष्मीमङ्गलमन्दिरोरसि लसन्मुक्तावळी कौस्तुभम् ।
हस्तैश्शङ्खरथाङ्ग पङ्कजगदा बिभ्राणमभ्राकृति
राकाचन्द्रमुखं सुजातमकुटं श्री सारनाथं भजे ॥

समुद्रवसने देवि पर्वतस्तनमण्डिते ।
विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥

अहल्या द्रौपदी सीता तारा मण्डोदरी तथा ।
पञ्च कन्याः स्मरेन्नित्यं महापातकनाशनम् ॥

आदित्यमंबिकां विष्णुं गणनाथं महेश्वरम् ।
पञ्च देवान्त्स्मरेन्नित्यं महापातकनाशनम् ॥

मैनाकं मन्दरं मेरुं कैलासं गन्धमादनम् ।
पञ्च शैलान्त्स्मरेन्नित्यं महापातकनाशनम् ॥

गोकोटिदानं ग्रहणेषु काले प्रयागगङ्गायुतकल्पवासः ।

यज्ञायुतं मेरुसुवर्णदानं गोविन्दकीर्ते न समं शतांशैः ॥

गोविन्देति सदा स्नानं गोविन्देति सदा जपः ।

गोविन्देति सदा ध्यानं सदा गोविन्दकीर्तनम् ॥

गोविन्दो दुःखनाशाय भवनाशाय माधवः ।

वामनः पापनाशाय केशवः क्लेशनाशनः ॥

गोविन्द गोविन्द हरे मुरारे गोविन्द गोविन्द मुकुन्द कृष्ण

गोविन्द गोविन्द रथाङ्गपाणे गोविन्दगिविन्द नमामि चेतः ॥

इति प्रातःस्मरणम् ॥

## अथ अधीतस्य अविस्मरणमन्त्रः ॥

वेदाक्षराणि यावन्ति पठितानि द्विजातिभिः ।

तावन्ति हरिनामानि कीर्तितानि न संशयः ॥

यदक्षरपदभ्रष्टं मन्त्राहीनं तु यद्भवेत् ।

तत्सर्वं क्षम्यतां देव नारायण नमोऽस्तु ते ॥

विसर्गबिन्दुमात्राणि पदपादाक्षराणि च ।

न्यूनानि चातिरिक्तानि क्षमस्व पुरुषोत्तम ॥

निर्जित्यवादसमये ऋषीन्त्सर्वानुपस्थितान् ।

गावो येन हृतास्तस्मै नमोऽस्तु ब्रह्मरातये ॥

ॐ अथातोऽधीत्याधीत्या निराकरणम् । प्रतीकं मे विचक्षणम् । जिह्वा मे मधु यद्वचः । कर्णाभ्यां भूरिशुश्रुवे मा त्वꣳ हार्षीः श्रुतं मयि । ब्रह्मणः प्रवचनमसि । ब्रह्मणः प्रतिष्ठानमसि । ब्रह्मकोशोऽसि सनिरसि । शान्तिरस्यनिराकरणमसि । ब्रह्मकोशं मे विश । वाचा त्वापिदधामि । वाचा त्वापिदधामि । तिष्ठ प्रतिष्ठ । स्वरकरणकण्ठ्यौरसदन्त्यौष्ठ्यग्रहण–धारणोच्चारण–शक्तिर्मयि भवतु । आप्यायन्तु मेऽङ्गानि वाक्प्राणश्चक्षुश्श्रोत्रꣳ य्यशो बलम् । यन्मे श्रुतमधीतं तन्मे मनसि तिष्ठतु तिष्ठतु ॥

इति अधीतस्य अविस्मरणमन्त्रः ॥

इति काण्वमन्त्रामृतं समाप्तम् ॥

ॐ तत्सत्

श्री महासवित्रे नमः ।

श्रीयाज्ञवल्क्यगुरुभ्योनमः ।

कण्वकात्यायनादि महर्षिभ्यो नमः ।

# श्री वाजसनेय (शुक्लयजुर्वेद)

# काण्वमन्त्रामृतम् ।

(रुद्र-चमक-पुरुषसूक्तादि संपुटितम्)



<u>प्रकाशनम्</u>

काण्वकुलपतीनां इञ्जिक्कोल्लै

श्रीचिदंबरघनपाठिमहोदयानां

अन्तेवासिभिः श्री परशुरामघनपाठिभिः

संशोध्य प्रकाशितम् ॥

प्रकाशकाः :- अध्यापकाः, श्रीयाज्ञवल्क्यगुरुकुलम्
No 23/7 NEDUNCHEZHIAN STREET
VIJAYALAKSHI PURAM,
AMBATTUR, CHENNAI- 600053
PHONE- 044-26571307

मूल्यम् :- काण्वशाखाध्येतॄणां उपकाराय
मूल्यं विना प्रदीयते ।

पुस्तकप्राप्तिस्थानम् :- अध्यापकाः, श्रीयाज्ञवल्क्यगुरुकुलम्
No 23/7 NEDUNCHEZHIAN STREET
VIJAYALAKSHI PURAM,
AMBATTUR, CHENNAI- 600053
PHONE- 044-26571307

मुद्रणम् :- HANI PRINTERS, # 3-7-209/c,
Giddangi St, TIRUPATI. 517501
Cell- 9848084920, 9291585027

इदं काण्वमन्त्रामृतम्
अम्बत्तूर् श्रीयाज्ञवल्क्यगुरुकुलाध्यापकानां

**श्रीयुत इञ्जिकोल्लै**
**परशुरामघनपाठिमहोदयानां**
**शताब्दीवैभवे**

०२-८-२०१३ दिनाङ्के प्रकाशितम् ।

अमोघा आशिषः समुल्लसन्तु ।
मदीयशताव्दजन्मदिने मत्स्मरणार्थं इदं
<u>काण्वमन्त्रामृतं</u>
भवत् करकमलयोः समर्प्यते । इदं गुरुमुखात्
अधीत्य, मनःपाठं कृत्वा, प्रतिदिनं पारायणं कृत्वा पुण्यं
संपाद्य मत्प्रार्थनां सफलां कुरुत ।
ब्रह्मश्री परशुरामघनपाठिन : । अम्बत्तूर् ।
<u>लोकाः समस्ताः सुखिनो भवन्तु ।</u>

## ॥ विषयानुक्रमणिका ॥


| क्र.सं | | | पृ.सं |
|---|---|---|---|
| 1 | गुरुप्रार्थना | – | VI |
| 2 | गणपति–सरस्वतीप्रार्थना | – | VII |
| 3 | उपाकर्मसूत्रम् | – | VIII |
| 4 | श्रीरुद्रम्–शतरुद्रीयमन्त्राः | – | 01 |
| 5 | चमकाध्यायः (वसोर्धारामन्त्राः) | – | 19 |
| 6 | पुरुषसूक्तम् | – | 31 |
| 7 | महाशान्तिसूक्तम् | – | 37 |
| 8 | ईशावास्योपनिषत् | – | 41 |
| 9 | विष्णुसूक्तम् | – | 45 |
| 10 | अग्निसूक्तम् | – | 47 |
| 11 | वात्सप्रसूक्तम् | – | 49 |
| 12 | अधिश्रवणमन्त्राः | – | 51 |
| 13 | पूर्णाहुतिसूक्तम् | – | 67 |
| 14 | सूर्यसूक्तम् | – | 69 |
| 15 | अथाभ्यारोहजपः | – | 73 |
| 16 | मण्डलब्राह्मणम् | – | 74 |
| 17 | भद्रसूक्तम् | – | 82 |
| 18 | शिवसङ्कल्पमन्त्राः | – | 84 |
| 19 | रुद्रध्यानश्लोकाः | – | 85 |
| 20 | ओषधिसूक्तम् | – | 87 |
| 21 | राष्ट्रभृत्सूक्तम् | – | 91 |
| 22 | नवग्रहसूक्तम् | – | 94 |
| 23 | दिक्पालकमन्त्राः | – | 99 |
| 24 | आदित्यहृदयम् | – | 103 |
| 25 | आर्याद्वादशकम्,सूर्यकवचम् | – | 107 |

| | | | |
|---|---|---|---|
| 26 | श्रीसूक्तम् | – | 111 |
| 27 | दुर्गासूक्तम् | – | 114 |
| 28 | सरस्वतीसूक्तम् | – | 115 |
| 29 | अशनिनिवारणमन्त्रः, स्वापकाले जप्यमन्त्रः | – | 117 |
| 30 | आयुष्यसूक्तम् | – | 118 |
| 31 | प्रातःस्मरणम् | – | 120 |
| 32 | अधीतस्य अविस्मरणमन्त्रः | – | 123 |

–इति शम्–

## गुरुप्रार्थना ।

ओ३म् भूर्भुवः स्वः ।

तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।

धियो यो नः प्रचोदयात् । श्रीमहा सवित्रे नमः ।

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यन्नत्वा कृतकृत्याः स्युस्तन्नमामि गजाननम् ॥
व्यासः पराशरमुनौ पितरि स्थितेऽपि
साक्षात्स्वयं मधुहरोऽपि यमेव वव्रे ।
आचार्यमद्भुतगुणोत्कर‍राजमानं तं
याज्ञवल्क्यगुरुमेव सदा नतोऽस्मि ॥ आदित्यपुराणम् ॥
वन्देऽहं मङ्गळात्मानं भास्वन्तं वेदविग्रहम् ।
याज्ञवल्क्यं मुनिश्रेष्ठं जिष्णुं हरिहरप्रभम् ।
जितेन्द्रियं जितक्रोधं सदा ध्यानपरायणम् ।
आनन्दनिलयं वन्दे योगानन्दं मुनीश्वरम् ॥
प्रणौम्याद्यं दिनमणिं योगीश्वरशिरोमणिम् ।
सर्वज्ञं याज्ञवल्क्यं तच्छिष्यं कात्यायनं मुनिम् ।
याज्ञवल्क्यसमारंभां कण्वयोगीसमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरंपराम् ॥
भानुगुप्तायातयामं वेदमानीय यो भुवि ।
अध्यापयत्कण्वमुख्यान् तस्मै वेदात्मने नमः ॥
अभिवाद्य गुरून्सर्वान् आदित्यादाचिदंवरम् ।
श्रीवाजसनेयकाण्वमन्त्रामृतं प्रकाश्यते ॥

## ॥ अथ गणपतिप्रार्थनामन्त्रः ॥

हरिः ॐ॒ गणानान्त्वा गणपतिꣳ हवामहे प्रियाणान्त्वा प्रियपतिꣳ हवामहे । निधीनान्त्वा निधिपतिꣳहवामहे वसो मम ॥ श्री महागणाधिपतये नमः ॥

## ॥ अथ सरस्वतीप्रार्थनामन्त्राः ॥

ॐ प्र नो यच्छत्वर्यमा प्र पूषा प्र सरस्वती ।
प्रवाग्देवी ददातु नः।

अर्यमणं बृहस्प्पतिमिन्द्रन्दानाय चोदय ।
वाचँ व्विष्णुꣳ सरस्वतीꣳ सवितारञ्च वाजिनम् ॥

श्री महा सरस्वत्यै नमः॥

## ॥ उपाकर्मसूत्रम् ॥

अथातोऽध्यायोपाकर्म । ओषधीनां प्रादुर्भावे श्रवणेन श्रावण्यां पौर्णमास्याᳬ श्रावणस्य पञ्चमीᳬ हस्तेन वाज्यभागाविष्ट्वा आज्याहुतीर्जुहोति । पृथिव्या–अग्नये–इत्यृग्वेदे, अन्तरिक्षाय–वायव इति यजुर्वेदे, दिवे–सूर्यायेति सामवेदे, दिग्भ्यश्चन्द्रमस इत्यथर्ववेदे, ब्रह्मणे– छन्दोभ्यश्चेति सर्वत्र, प्रजापतये देवेभ्य ऋषिभ्यः श्रद्धायै मेधायै सदसस्पतये अनुमतय इति, चैतदेव व्रतादेशनविसर्गेषु सदसस्पति मित्यक्षतधानास्त्रिः सर्वेऽनुपठेयुर्हुत्वाहुत्वौदुम्बर्य स्तिस्रस्तिस्रः समिध आदध्युरार्द्राः सपलाशा घृताक्ताः सावित्र्या ब्रह्मचारिणश्च पूर्वकल्पेन शन्नो भवन्त्वित्यक्षतधाना अखादन्तः प्राश्नीयुर्दधिक्राव्ण इति दधि भक्षयेयुः, स यावन्तं गणमिच्छेत् तावतस्तिलानाकर्षफलकेन जुहुयात्सावित्र्या शुक्रज्योति रित्यनुवाकेन वा प्राशनान्ते प्रत्यङ्मुखेभ्य उपविष्टेभ्यः, ॐकार मुक्त्वा त्रिश्च सावित्रीमध्यायादीन् प्रब्रूयादृषिमुखानि बह्वृचानां पर्वाणि च्छन्दोगानाᳬ सूक्तान्यथर्वणानाᳬ सर्वे जपन्ति सह नोऽस्तु सह नोऽवतु सह न इदं वीर्यवदस्तु ब्रह्म । इन्द्रस्तद्वेद येन यथा न विद्विषामह इति त्रिरात्रं नाधीयीरँल्लोम नखाना मनिकृन्तनमेके प्रागुत्सर्गात् ॥ (पारस्करगृह्यसूत्रम्–२–१०)

असौ योऽवसर्पति नीलग्रीवो विलोहितः । उतैनङ्गोपा

अदृश्रन्नदृश्रन्नुदहार्यः स दृष्टो मृळयाति नः ॥७॥

नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीह्ळुषे ।

अथो ये अस्य सत्वानोऽहन्तेभ्योऽकरन्नमः ॥८॥

प्रमुञ्च धन्वनस्त्वमुभयोरार्त्न्योर्ज्याम् ।

याश्च ते हस्त इषवः परा ता भगवो वप ॥९॥

विज्यन्धनुः कपर्दिनो विशल्यो बाणवाँ उत ।

अनेशन्नस्य या इषव आभुरस्य निषङ्गधिः ॥१०॥

परि ते धन्वनो हेतिरस्मान् वृणक्तु विश्वतः ।

अथो य इषुधिस्तवारे अस्मन्निधेहि तम् ॥११॥

या ते हेतिर्मीह्ळुष्टम हस्ते बभूव ते धनुः ।

तयास्मान् विश्वतस्त्वमयक्ष्मया परि भुज ॥१२॥

अवतत्य धनुष्ट्वꣳ सहस्राक्ष शतेषुधे ।

निशीर्य शल्यानां मुखा शिवो नः सुमना भव ॥१३॥

नमस्त आयुधायानातताय धृष्णवे ।

उभाभ्यामुत ते नमो बाहुभ्यान्तव धन्वने ॥१४॥

मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न

उक्षितम् । मा नोऽवधीः प्पितरं मोत मातरं मा नः

प्प्रियास्तन्वो रुद्र रीरिषः ॥१५॥

मा नस्तोके तनये मा न आयुषि मानो गोषु मा नो अश्वेषु

रीरिषः । मा नो वीरान् रुद्र भामिनोऽवधीर्हविष्मन्तः सदमित्

त्वा हवामहे ॥१६॥१॥

नमो हिरण्यबाहवे सेनान्ये दिशाञ्च पतये नमो

नमो वृक्षेभ्यो हरिकेशेभ्यः प्पशूनां पतये नमः ।

नमः शष्पिञ्जराय त्विषीमते पथीनां पतये नमो

अथ श्रीरुद्राध्यायः॥ (शतरुद्रीयमन्त्राः ॥)

ॐ नमो भगवते रुद्राय ॥ ॐनमस्ते रुद्र मन्यव

उतो त इषवे नमः । बाहुभ्यामुत ते नमः ॥१॥

या ते रुद्र शिवा तनूरघोरापापकाशिनी ।

तया नस्तन्वा शन्तमया गिरिशन्ताभि चाकशीहि ॥२॥

यामिषुङ्गिरिशन्त हस्ते बिभर्ष्यस्तवे ।

शिवाङ्गिरित्र ताङ्कुरु मा हिꣳसीः प्पुरुषञ्जगत् ॥३॥

शिवेन वचसा त्वा गिरिशाच्छा वदामसि ।

यथा नः सर्वमिज्जगदयक्ष्मꣳसुमना असत् ॥४॥

अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् । अहीꣳश्च

सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्योऽधराचीः प्परा सुव ॥५॥

असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः । ये चैनꣳरुद्रा

अभितो दिक्षु श्रिताः सहस्रशोऽवैषाꣳ हेळ ईमहे ॥६॥

नमो हरिकेशायोपवीतिने पुष्टानां पतये नमः ॥१॥

नमो बभ्लुशायाव्याधिनेऽन्नानां पतये नमो

नमो भवस्य हेत्यै जगतां पतये नमः ।

नमो रुद्रायाततायिने क्षेत्राणां पतये नमो

नमः सूतायाहन्त्यै वनानां पतये नमः ॥२॥

नमो रोहिताय स्थपतये वृक्षाणां पतये नमो

नमो भुवन्तये वारिवस्कृतायौषधीनां पतये नमः ।

नमो मन्त्रिणे वाणिजाय कक्षाणां पतये नमो

नम उच्चैर्घोषायाक्रन्दयते पत्तीनां पतये नमः ॥३॥

नमः कृत्स्नायतया धावते सत्वनां पतये नमो

नमः सहमानाय निव्याधिन आव्याधिनीनां पतये नमः ।

नमः ककुभाय निषङ्गिणे स्तेनानां पतये नमो

नमो निचेरवे परिचरायारण्यानां पतये नमः ॥४॥

नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो
नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमः ।
नमः सृकायिभ्यो जिघाꣳसद्भ्यो मुष्णतां पतये नमो
नमोऽसिमद्भ्यो नक्तञ्चरद्भ्यो विकृन्तानां पतये नमः ॥५॥२॥

नम उष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमो
नम इषुमद्भ्यो धन्वायिभ्यश्च वो नमः ।
नम आतन्वानेभ्यः प्रति दधानेभ्यश्च वो नमो
नम आयच्छद्भ्योऽस्यद्भ्यश्च वो नमः ॥१॥
नमो विसृजद्भ्यो विध्यद्भ्यश्च वो नमो
नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमः ।
नमः शयानेभ्य आसीनेभ्यश्च वो नमो
नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमः ॥२॥

नमः सभाभ्यः सभापतिभ्यश्च वो नमो

नमोऽश्वेभ्योऽश्वपतिभ्यश्च वो नमः।

नम आव्याधीनीभ्यो विविध्यन्तीभ्यश्च वो नमो

नम उगणाभ्यस्तृꣳहतीभ्यश्च वो नमः ॥३॥

नमो गणेभ्यो गणपतिभ्य वो नमो

नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमः ।

नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो

नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमः ॥४॥

नमः सेनाभ्यः सेनानिभ्यश्च वो नमो

नमो रथिभ्यो अरथेभ्यश्च वो नमः।

नमः क्षत्तृभ्यः सङ्ग्रहीतृभ्यश्च वो नमो

नमो महद्भ्यो अर्भकेभ्यश्च वो नमः ॥५॥३॥

नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो
नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमः ।
नमो निषादेभ्यः पुञ्जिष्ठेभ्यश्च वो नमो
नमः श्वनिभ्यो मृगयुभ्यश्च वो नमः ॥१॥
नमः श्वभ्यः श्वपतिभ्यश्च वो नमो नमो भवाय च रुद्राय च
नमः शर्वाय च पशुपतये च नमो
नीलग्रीवाय च शितिकण्ठाय च ॥२॥
नमः कपर्दिने च व्युप्तकेशाय च नमः
सहस्राक्षाय च शतधन्वने च ।
नमो गिरिशयाय च शिपिविष्टाय च नमो
मीढुष्टमाय चेषुमते च ॥३॥
नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च ।
नमो वृद्धाय च सवृधे च नमोऽग्र्याय च प्रथमाय च ॥४॥

नम आशवे चाजिराय च नमः शीघ्र्याय च शीभ्याय च ।
नम ऊर्म्याय चावस्वन्याय च नमो नादेयाय च द्वीप्याय च ॥५॥४॥

नमो ज्येष्ठाय च कनिष्ठाय च नमः प्पूर्वजाय चापरजाय च ।
नमो मध्यमाय चापगल्भाय च नमो जघन्याच बुध्न्याय च ॥१॥
नमः सोभ्याय च प्रतिसर्याय च नमो याम्याय च क्षेम्याय च ।
नमःश्लोक्याय चावसान्याय चनम उर्वर्याय च खल्याय च॥२॥
नमो वन्याय च कक्ष्याय च नमः श्रवाय च प्रतिश्रवाय च ।
नम आशुषेणाय चाशुरथाय च नमः शूराय चावभेदिने च॥३॥
नमो बिल्मिने च कवचिनेच नमो वर्मिणे च वरूथिने च ।
नमःश्रुताय च श्रुतसेनाय च नमो दुन्दुभ्यायचाहनन्याय च॥४॥
नमो धृष्णावे च प्रमृशाय च नमो निषङ्गिणे चेषुधिमते च।
नमस्तीक्ष्णेषवे चायुधिने च नमःस्वायुधाय च सुधन्वने च ॥५॥५॥

नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च ।
नमः कुल्याय च सरस्याय च नमो नादेयाय च वैशन्ताय च ॥१॥
नमः कूप्याय चावट्याय च नम ईध्रियाय चातप्याय च ।
नमो मेघ्याय च विद्युत्याय च नमो वर्ष्याय चावर्ष्याय च ॥२॥
नमो वात्याय च रेष्म्याय च नमो वास्तव्याय च वास्तुपाय च ।
नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च ॥३॥
नमः शङ्गवे च पशुपतये च नम उग्राय च भीमाय च ।
नमोऽग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च ॥४॥
नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय ।
नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥५॥६॥

नमः पार्याय चावार्याय च नमः प्रतरणाय चोत्तरणाय च ।

नमस्तीर्थ्याय च कूल्याय च नमः शष्प्याय च फेन्याय च ॥१॥

नमः सिकत्याय च प्रवाह्याय च नमः किꣳशिलाय च

क्षयणाय च । नमः कपर्दिने च पुलस्तिने च नम इरिण्याय

च प्रपथ्याय च ॥२॥

नमो व्रज्याय च गोष्ठ्याय च नमस्तल्प्याय च गेह्याय च ।

नमो हृद्याय च निवेष्प्याय च नमः काट्याय च गह्वरेष्ठाय च ॥३॥

नमः शुष्क्याय च हरित्याय च नमः पाꣳसव्याय च रजस्याय च ।

नमो लोप्याय चोलप्याय च नम ऊर्व्याय च सूर्व्याय च ॥४॥

नमः पर्ण्याय च पर्णशदाय च नम उद्गुरमाणाय चाभिघ्नते च

नम आखिदते च प्रखिदते च नम

इषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमः ।

नमो वः किरिकेभ्यो देवानाꣳ हृदयेभ्यो नमो विचिन्वत्केभ्यो

नमो विक्षिणत्केभ्यो नम आनिर्हतेभ्यः ॥५॥७॥

द्रापे अन्धसस्पते दरिद्र नीललोहित । आसां प्रजानामेषां
पशूनां मा भेर्मा रोङ्मो च नः किञ्चनाममत् ॥१॥
इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः ।
यथा शमसद्द्विपदे चतुष्पदे विश्वं पुष्टङ्ग्रामे अस्मिन्ननातुरम् ॥२॥
या ते रुद्र शिवा तनूः शिवा विश्वाहा भेषजी ।
शिव ऋतस्य भेषजी तया नो मृळ जीवसे ॥३॥
परि णो हेती रुद्रस्य वृज्यात् परि त्वेषस्य दुर्मतिर्मही गात् ।
अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृळ ॥४॥
मीह्ळुष्टम शिवतम शिवो नः सुमना भव ।
परमे वृक्ष आयुधन्निधाय कृत्तिं व्वसान
आचर पिनाकं बिभ्रदागहि ॥५॥
विकिरिद्र विलोहित नमस्ते अस्तु भगवः ।
यास्ते सहस्रꣳ हेतयोऽन्यमस्मन्नि वपन्तु ताः ॥६॥

सहस्राणि सहस्रशो बाह्वोस्तव हेतयः ।

तासामीशानो भगवः पराचीना मुखा कृधि ॥७॥

असङ्ख्याता सहस्राणि ये रुद्रा अधि भूम्याम् ।

तेषाँ्सहस्रयोजनेऽव धन्वानि तन्मसि ॥८॥

अस्मिन्महत्यर्णवेऽन्तरिक्षे भवा अधि ।

तेषाँ् सहस्रयोजनेऽव धन्वानि तन्मसि ॥९॥

नीलग्रीवाः शितिकण्ठा दिवँ् रुद्रा उपश्रिताः ।

तेषाँ् सहस्रयोजनेऽव धन्वानि तन्मसि ॥१०॥

नीलग्रीवाः शितिकण्ठाः शर्वा अधः क्षमाचराः ।

तेषाँ् सहस्रयोजनेऽव धन्वानि तन्मसि ॥११॥

ये वृक्षेषु शष्पिञ्जरा नीलग्रीवा विलोहिताः ।

तेषाँ् सहस्रयोजनेऽव धन्वानि तन्मसि ॥१२॥

ये भूतानामधिपतयो विशिखासः कपर्दिनः ।

तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥१३॥

ये पथां पथिरक्षिण ऐळबृदा आयुर्युधः ।

तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥१४॥

ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः ।

तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥१५॥

येऽन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् ।

तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥१६॥

य एतावन्तश्च भूयाꣳसश्च दिशो रुद्रा वितस्थिरे ।

तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥१७॥

नमोऽस्तु रुद्रेभ्यो ये दिवि येषाँ व्वर्षमिषवः ।

तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः।

तेभ्यो नमो अस्तु तेनो मृळयन्तु ते नोऽवन्तु ।

तेयन्द्विष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दध्मः ।

नमोऽस्तु रुद्रेभ्यो येऽन्तरिक्षे येषाँ व्वात इषवः ।
तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः।
तेभ्यो नमो अस्तु तेनो मृळयन्तु ते नोऽवन्तु ।
तेयन्द्विष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दध्मः ।
नमोऽस्तु रुद्रेभ्यो ये पृथिव्याँ व्येषामन्नमिषवः ।
तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः।
तेभ्यो नमो अस्तु तेनो मृळयन्तु ते नोऽवन्तु ।
तेयन्द्विष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दध्मः ॥१८॥६४॥

ॐ नमो भगवते रुद्राय[१] ।

ॐ वय९ सोम व्रते तव मनस्तनूषु बिभ्रतः ।
प्रजावन्तः सचेमहि ॥६५॥

---

१, श्रीरुद्रे बहवो रुद्राः पठिताः । शतरुद्रीयमित्यत्र शतशब्दः बहर्थवाचि, शतपथशब्दवत् । संप्रदाये श्रीरुद्राध्यायमन्त्रैः सह शतसंख्यापूरणार्थं वय९ सोम इत्यादीन् मन्त्रानपि जपन्ति । ते अपि अत्र संयोजिताः ॥

एष ते रुद्रभागः सह स्वस्राम्बिकया तञ्जुषस्व स्वाहा ।

एष ते रुद्र भाग आखुस्ते पशुः ॥६६॥

अव रुद्रमदीमह्यव देवन्त्र्यम्बकम् । यथा नो वस्यसस्करद्यथा

नः श्रेयसस्करद्यथा नो व्यवसाययात् ॥६७॥

भेषजमसि भेषजङ्गवेऽश्वाय पुरुषाय भेषजम् ।

सुगं मेषाय मेष्यै ॥६८॥

त्र्यम्बकँ यजामहे सुगन्धिं पुष्टिवर्द्धनम् ।

उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् ॥६९॥

त्र्यम्बकँ यजामहे सुगन्धिं पतिवेदनम् ।

उर्वारुकमिव बन्धनादितो मुक्षीय मामुतः ॥७०॥

एतेन रुद्रावसेन परो मूजवतोऽतीहि ।

अवततधन्वा पिनाकावसः कृत्तिवासा अहिँसन्नः

शिवः शान्तोऽतीहि ॥७१॥

यज्जाग्रतो दूरमुदैति दैवन्तदु सुप्तस्य तथैवैति ।

दूरङ्गमञ्ज्योतिषाञ्ज्योतिरेकन्तन्मे मनः शिवसङ्कल्पमस्तु ॥७२॥

न ते दूरे परमा चिद्रजाᳬस्यातु प्र याहि हरिवो हरिभ्याम् ।

स्थिराय वृष्णे सवना कृतेमा युक्ता ग्रावाणः समिधाने अग्नौ॥

अषाह्ळँ य्युत्सु पृतनासु पप्रिᳬ स्वर्षामप्साँ वृजनस्य

गोपाम् । भरेषुजाᳬ सुक्षितिᳬ सुश्रवसञ्जयन्तन्त्वामनु

मदेम सोम ॥७४॥

उग्रश्च भीमश्च ध्वान्तश्च धुनिश्च ।

सासह्वाᳬश्चाभियुग्वा च विक्षिपः स्वाहा ॥७५॥

अग्निᳬ हृदयेनाशनिᳬ हृदयाग्रेण पशुपतिङ्कृत्स्नहृदयेन

भवँ य्यक्ना । शर्वं मतस्नाभ्यामिशानं मन्युना

महादेवमन्तःप्पर्शव्येनोग्रन्देवँ व्वनिष्ठुना वसिष्ठहनुः

शिङ्गीनि कोश्याभ्याम् ॥७६॥

एष ते निरृत्ते भागस्तञ्जुषस्व स्वाहाग्निनेत्रेभ्यो देवेभ्यः

प्पुरस्सद्भ्यः स्वाहा यमनेत्रेभ्यो देवेभ्यो दक्षिणसद्भ्यः

स्वाहा । विश्वदेवनेत्रेभ्यो देवेभ्यः प्पश्चात्सद्भ्यः स्वाहा

मित्रावरुणनेत्रेभ्यो वा मरुन्नेत्रेभ्यो वा देवेभ्य उत्तरसद्भ्यः

स्वाहा । सोमनेत्रेभ्यो देवेभ्य उपरिसद्भ्यो दुवस्वद्भ्यः

स्वाहा ॥७७॥

ये देवा अग्निनेत्राः प्पुरस्सदस्तेभ्यः स्वाहा ये देवा

यमनेत्रा दक्षिणसदस्तेभ्यः स्वाहा । ये देवा

विश्वदेवनेत्राः प्पश्चात्सदस्तेभ्यः स्वाहा ये देवा

मित्रावरुणनेत्रा वा मरुन्नेत्रा वोत्तरसदस्तेभ्यः स्वाहा ।

ये देवाः सोमनेत्रा उपरिसदो दुवस्वन्तस्तेभ्यः स्वाहा ॥७८॥

मीढुष्टम शिवतम शिवो नः सुमना भव ।
परमे वृक्ष आयुधन्निधाय कृत्तिँ व्वसान
आचर पिनाकं बिभ्रदागहि ॥७९॥
विकिरिद्र विलोहित नमस्ते अस्तु भगवः ।
यास्ते सहस्रँ हेतयोऽन्यमस्मन्नि वपन्तु ताः ॥८०॥
सहस्राणि सहस्रशो बाह्वोस्तव हेतयः ।
तासामीशानो भगवः प्पराचीना मुखा कृधि ॥८१॥
असङ्ख्याता सहस्राणि ये रुद्रा अधि भूम्याम् ।
तेषाँ सहस्रयोजनेऽव धन्वानि तन्मसि ॥८२॥

ईशावास्यं अष्टादशमन्त्राः (41 पृष्ठे द्रष्टव्यः)

इति शतरुद्रीयमन्त्राः ।

## चमकाध्यायः (वसोर्धारामन्त्राः)

इमꣳ स्तनमूर्जस्वन्तन्धयापां प्रपीनमग्ने सरिरस्य मध्ये ।
उत्सञ्जुषस्व शतधारमर्वन्त्समुद्रियꣳ सदनमा विशस्व ॥१॥
घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम ।
अनुष्वधमा वह मादयस्व स्वाहाकृतँ वृषभ वक्षि हव्यम् ॥२॥
समुद्रादूर्मिर्मधुमाँ उदारदुपाꣳशुना सममृतत्वमानट् ।
घृतस्य नाम गुह्यँ यदस्ति जिह्वा देवानाममृतस्य नाभिः॥३॥
वयन्नाम प्र ब्रवामा घृतस्यास्मिन्यज्ञे धारयामा नमोभिः ।
उप ब्रह्मा शृणवच्छस्यमानञ्चतुःशृङ्गोऽवमीद्गौर एतत् ॥४॥
चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आविवेश ॥५॥
त्रिधा हितं पणिभिर्गुह्यमानङ्गवि देवासो घृतमन्वविन्दन् ।
इन्द्र एकꣳ सूर्य एकञ्जजान वेनादेकꣳ स्वधया निष्टतक्षुः ॥६॥

एता अर्षन्ति हृद्यात्समुद्राच्छतव्रजा रिपुणा नावचक्षे ।
घृतस्यधारा अभि चाकशीमि हिरण्ययो वेतसो मध्यआसाम् ।
सम्यक्स्रवन्ति सरितो न धेना अन्तर्हृदा मनसा पूयमानाः ।
एते अर्षन्त्यूर्मयो घृतस्य मृगाइव क्षिपणोरीशमाणाः ॥७॥
सिन्धोरिव प्राध्वने शूघनासो वातप्रमियः प्पतयन्ति यह्वाः ।
घृतस्य धारा अरुषो न वाजी काष्ठा भिन्दन्नूर्मिभिः
पिन्वमानः॥८॥
अभि प्रवन्त समनेव योषाः कल्याण्य स्मयमानासो अग्निम्।
घृतस्य धाराःसमिधो नसन्त ता जुषाणो हर्यति जातवेदाः॥९॥
कन्याइव वहतुमेतवा उ अञ्ज्यञ्जाना अभिचाकशीमि।
यत्र सोमःसूयते यत्र यज्ञो घृतस्य धारा अभि तत्पवन्ते॥१०॥
अभ्यर्षत सुष्टुतिङ्गव्य माजिमस्मासु भद्रा द्रविणानि धत्त ।
इमँ व्यज्ञन्नयत देवता नो घृतस्य धारा मधुमत्पवन्ते ॥११॥

धामन्त्ते विश्वं भुवनमधिश्रितमन्तः समुद्रे हृद्यन्तरायुषि ।
अपामनीके समिथे य आभृतस्तमश्याम मधुमन्तन्त ऊर्मिं ॥१२॥१॥

---

वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे ।
धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे । श्रावश्च मे
श्रुतिश्च मे ज्योतिश्च मे स्वश्च मे यज्ञेन कल्पन्ताम् ॥१॥
प्राणश्च मेऽपानश्च मे व्यानश्च मेऽसु च मे ।
चित्तञ्च म आधीतञ्च मे वाक्च मे मनश्च मे । चक्षुश्च मे
श्रोत्रञ्च मे दक्षश्च मे बलञ्च मे यज्ञेन कल्पन्ताम् ॥२॥
ओजश्च मे सहश्च म आत्मा च मे तनूश्च मे । शर्म च मे
वर्म च मेऽङ्गानि च मेऽस्थीनि च मे । परूꣳषि च मे
शरीराणि च म आयुश्च मे जरा च मे यज्ञेन कल्पन्ताम्॥३॥
ज्यैष्ठ्यञ्च म आधिपत्यञ्च मे मन्युश्च मे भामश्च मे ।

अमश्च मेऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्षिमा च मे द्राघिमा च मे । वृद्धञ्च मे वृद्धिश्च मे यज्ञेन कल्पन्ताम् ॥३॥२॥

---

सत्यञ्च मे श्रद्धा च मे जगच्च मे धनञ्च मे । विश्वञ्च मे महश्च मे क्रीळा च मे मोदश्च मे । जातञ्च मे जनिष्यमाणञ्च मे सूक्तञ्च मे सुकृतञ्च मे यज्ञेन कल्पन्ताम् ॥१॥

वित्तञ्च मे वेद्यञ्च मे भूतञ्च मे भविष्यच्च मे । सुगञ्च मे सुपथ्यञ्च म ऋद्धञ्च म ऋद्धिश्च मे । क्लृप्तञ्च मे क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे यज्ञेन कल्पन्ताम् ॥२॥

यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे । विश्वञ्च

मे महश्च मे सँव्विच्च मे ज्ञात्रञ्च मे । सीरञ्च मे
लयश्च मे सूश्च मे प्रसूश्च मे यज्ञेन कल्पन्ताम् ॥३॥
शञ्च मे मयश्च मे प्रियञ्च मेऽनुकामश्च मे । कामश्च
मे सौमनसश्च मे भगश्च मे द्रविणञ्च मे । भद्रञ्च मे
श्रेयश्च मे वसीयश्च मे यशश्च मे यज्ञेन कल्पन्ताम् ॥४॥३॥

ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे ।
घृतञ्च मे मधु च मे सग्धिश्च मे सपीतिश्च मे । कृषिश्च मे
वृष्टिश्च मे जैत्रञ्च म औद्भिद्यञ्च मे यज्ञेन कल्पन्ताम् ॥१॥
ऋतञ्च मेऽमृतञ्च मेऽयक्ष्मञ्च मेऽनामयच्च मे ।
जीवातुश्च मे दीर्घायुत्वञ्च मेऽनमित्रञ्च मेऽभयञ्च मे ।
सुगञ्च मे शयनञ्च मे सूषाश्च मे सुदिनञ्च मे यज्ञेन
कल्पन्ताम् ॥२॥

रयिश्च मे रायश्च मे पुष्टञ्च मे पुष्टिश्च मे । विभु च मे प्रभु च मे पूर्णञ्च मे पूर्णतरञ्च मे । कुयवञ्च मेऽक्षितञ्च मेऽन्नञ्च मेऽक्षुच्च मे यज्ञेन कल्पन्ताम् ॥३॥

व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे । मुद्गाश्च मे खल्वाश्च मे प्रियङ्गवश्च मेऽणवश्च मे । श्यामाकाश्चमे नीवाराश्च मे गोधूमाश्च मे मसूराश्च मे यज्ञेन कल्पन्ताम् ॥४॥४॥

अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे । सिकताश्च मे वनस्पतयश्च मे हिरण्यञ्च मेऽयश्च मे । सीसञ्च मे त्रपु च मे श्यामञ्च मे लोहञ्च मे यज्ञेन कल्पन्ताम् ॥१॥

अग्निश्च म आपश्च मे वीरुधश्च म ओषधयश्च मे । कृष्टपच्याश्च मे कृष्टपच्याश्च मे ग्राम्याश्च मे पशव

रयिश्च मे रायश्च मे पुष्टञ्च मे पुष्टिश्च मे । विभु च मे प्रभु च मे पूर्णञ्च मे पूर्णतरञ्च मे । कुयवञ्च मेऽक्षितञ्च मेऽन्नञ्च मेऽक्षुच्च मे यज्ञेन कल्पन्ताम् ॥३॥

व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे । मुद्गाश्च मे खल्वाश्च मे प्रियङ्गवश्च मेऽणवश्च मे । श्यामाकाश्चमे नीवाराश्च मे गोधूमाश्च मे मसूराश्च मे यज्ञेन कल्पन्ताम् ॥४॥४॥

---

अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे । सिकताश्च मे वनस्पतयश्च मे हिरण्यञ्च मेऽयश्च मे । सीसञ्च मे त्रपु च मे श्यामञ्च मे लोहञ्च मे यज्ञेन कल्पन्ताम् ॥१॥

अग्निश्च म आपश्च मे वीरुधश्च म ओषधयश्च मे । कृष्टपच्याश्च मे कृष्टपच्याश्च मे ग्राम्याश्च मे पशव

द्यौश्च म इन्द्रश्च मे समाश्च म इन्द्रश्च मे । नक्षत्राणि च म इन्द्रश्च मे दिशश्च म इन्द्रश्च मे यज्ञेनकल्पन्ताम् ॥३॥६॥

अꣳशुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च मे । उपाꣳशुश्च मेऽन्तर्यामश्च म ऐन्द्रवायवश्च मे मैत्रावरुणश्च मे । आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च मे यज्ञेन कल्पन्ताम् ॥१॥

आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च मे । ऐन्द्राग्नश्च मे महावैश्वदेवश्च मे मरुत्वतीयाश्च मे निष्केवल्यश्च मे । सावित्रश्च मे सारस्वतश्च मे पात्नीवतश्च मे हारियोजनश्च मे यज्ञेन कल्पन्ताम् ॥२॥

स्रुचश्च मे चमसाश्च मे वायव्यानि च मे द्रोणकलशश्च मे । ग्रावाणश्च मेऽधिषवणे च मे पूतभृच्च म आधवनीयश्च मे ।

वेदिश्च मे बर्हिश्च मे स्वगाकारश्च मेऽवभृथश्च मे यज्ञेन
कल्पन्ताम् ॥३॥

अग्निश्च मे घर्मश्च मेऽर्कश्च मे सूर्यश्च मे । प्राणश्च
मेऽश्वमेधश्च मे पृथिवी च मेऽदितिश्च मे । दितिश्च मे द्यौश्च
मेऽङ्गुलयः शक्वरयो दिशश्च मे यज्ञेन कल्पन्ताम् ॥४॥

व्रतञ्च म ऋतवश्च मे सँव्वत्सरश्च मे तपश्च मे। अहोरात्रे
ऊर्वष्ठीवे बृहद्रथन्तरे च मे यज्ञेन कल्पन्ताम् ॥५॥७॥

एका च मे तिस्रश्च मे तिस्रश्च मे पञ्च च मे पञ्च च
मे सप्त च मे सप्त च मे नव च मे नव च म
एकादश च म एकादश च मे त्रयोदश च मे त्रयोदश
च मे । पञ्चदश च मे पञ्चदश च मे सप्तदश च मे
सप्तदश च मे नवदश च मे नवदश च म

एकविꣳशतिश्च म एकविꣳशतिश्च मे त्रयोविꣳशतिश्च मे
त्रयोविꣳशतिश्च मे । पञ्चविꣳशतिश्च मे
पञ्चविꣳशतिश्च मे सप्तविꣳशतिश्च मे सप्तविꣳशतिश्च
मे नवविꣳशतिश्च मे नवविꣳशतिश्च म एकत्रिꣳशच्च म
एकत्रिꣳशच्च मे त्रयस्त्रिꣳशच्च मे यज्ञेन कल्पन्ताम् ॥१॥
चतस्रश्च मेऽष्टौ च मेऽष्टौ च मे द्वादश च मे द्वादश च
मे षोळश च मे षोळश च मे विꣳशतिश्च मे
विꣳशतिश्च मे चतुर्विꣳशतिश्च मे चतुर्विꣳशतिश्च
मेऽष्टाविꣳशतिश्च मेऽष्टाविꣳशतिश्च मे । द्वात्रिꣳशच्च मे
द्वात्रिꣳशच्च मे षट्त्रिꣳशच्च मे षट्त्रिꣳशच्च मे
चत्वारिꣳशच्च मे चत्वारिꣳशच्च मे
चतुश्चत्वारिꣳशच्च मे चतुश्चत्वारिꣳशच्च
मेऽष्टाचत्वारिꣳशच्च मे यज्ञेन कल्पन्ताम् ॥२॥

त्र्यविश्च मे त्र्यवी च मे दित्यवाट् च मे दित्यौही च मे ।
पञ्चाविश्च मे पञ्चावी च मे त्रिवत्सश्च मे त्रिवत्सा च
मे । तुर्यवाट् च मे तुर्यौही च मे यज्ञेन कल्पन्ताम्॥३॥
पष्ठवाट् च मे पष्ठौही च म उक्षा च मे वशा च मे ।
ऋषभश्च मे वेहच्च मेऽनड्वाꣳश्च मे धेनुश्च मे यज्ञेन
कल्पन्ताम् ॥४॥८॥

वाजाय स्वाहा प्रसवाय स्वाहापिजाय स्वाहा क्रतवे
स्वाहा । वसवे स्वाहाहर्पतये स्वाहा ।
अह्ने मुग्धाय स्वाहा मुग्धाय वैनꣳशिनाय स्वाहा
विनꣳशिन आन्त्यायनाय स्वाहान्त्याय भौवनाय स्वाहा
भुवनस्य पतये स्वाहाधिपतये स्वाहा प्रजापतये स्वाहा ॥१॥
इयन्ते राण्मित्राय यन्तासि यमनः ।

ऊर्जे त्वा वृष्ट्यै त्वा प्रजानान्त्वाधिपत्याय ॥२॥

आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पताञ्चक्षुर्यज्ञेन कल्पताꣳ श्रोत्रँ य्यज्ञेन कल्पताम् । वाग्यज्ञेन कल्पतां मनो यज्ञेन कल्पतामात्मा यज्ञेन कल्पतां पृष्ठँ य्यज्ञेन कल्पताम् । ब्रह्म यज्ञेन कल्पताँ य्यज्ञो यज्ञेन कल्पता–ञ्ज्योतिर्यज्ञेन कल्पताꣳ स्वर्यज्ञेन कल्पताम् ॥३॥

स्तोमश्च यजुश्च ऋक्च साम च बृहच्च रथन्तरञ्च । स्वर्देवा अगन्मामृता अभूम प्रजापतेः प्प्रजा अभूम वेट् स्वाहा ॥४॥९॥

इति चमकाध्यायः (वसोर्धारामन्त्राः) ॥

## अथ पुरुषसूक्तम् ॥

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिꣳ सर्वत स्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥१॥
पुरुष एवेदꣳ सर्वं यद्भूतं यच्च भाव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥२॥
एतावानस्य महिमातो ज्यायाꣳश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतन्दिवि ॥३॥
त्रिपादूर्ध्व उदैत्पुरुषः प्पादोऽस्येहाभवत्पुनः ।
ततो विष्वङ् व्यक्रामत्साशनानशने अभि ॥४॥
ततो विराळजायत विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥५॥
तस्माद्यज्ञात् सर्वहुतः संभृतं पृषदाज्यम् ।
पशूꣳस्ताꣳश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ॥६॥

तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे ।
छन्दाꣳसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥७॥
तस्मादश्वा अजायन्त ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥८॥
तँ य्यज्ञं बर्हिषि प्रौक्षन्पुरुषञ्जातमग्रतः ।
तेन देवा अयजन्त साध्या ऋषयश्च ये ॥९॥
यत्पुरुषँ व्यदधुः कतिधा व्यकल्पयन् ।
मुखङ्किमस्यासीत्किं बाहू किमूरू पादा उच्येते ॥१०॥
ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः प्पद्भ्याꣳ शूद्रो अजायत ॥११॥
चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥१२॥
नाभ्या आसीदन्तरिक्षꣳ शीर्ष्णो द्यौः समवर्तत ।

पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ अकल्पयन् ॥१३॥
यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तोऽस्यासीदाज्यङ्ग्रीष्म इध्मःशरद्धविः ॥१४॥
सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः ।
देवा यद्यज्ञन्तन्वाना अबध्नन् पुरुषं पशुम् ॥१५॥
यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः॥१६॥२॥

---

अद्भ्यः संभृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्तताग्रे ।
तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे ॥१॥
वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः प्परस्तात् ।
तमेव विदित्वाति मृत्युमेति नान्यः प्पन्था विद्यतेऽयनाय ॥२॥
प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा वि जायते ।

तस्य॒योनिं॒परि॑पश्यन्ति॒धीरा॒स्तस्मि॑न्ह॒तस्थु॒र्भुव॑नानि॒विश्वा॑ ॥३॥

यो दे॒वेभ्य॑ आ॒तप॑ति॒ यो दे॒वानां॑ पु॒रोहि॑तः ।

पूर्वो॒ यो दे॒वेभ्यो॑ जा॒तो नमो॑ रु॒चाय॒ ब्राह्म॑ये ॥४॥

रु॒चं ब्रा॒ह्म्ञ्जन॑यन्तो दे॒वा अग्रे॑ त॒दब्रुवन् ।

यस्त्वै॒वं ब्रा॑ह्म॒णो वि॒द्यात्तस्य॑ दे॒वा अ॒सन्वशे॑ ॥५॥

श्रीश्च॑ ते ल॒क्ष्मीश्च॒ पत्न्या॑ अहोरा॒त्रे पा॒र्श्वे नक्ष॑त्राणि

रू॒पम॒श्विनौ॒ व्यात्त॑म् । इ॒ष्णन्नि॑षाणामुं॒ म इ॑षाण सर्वलो॒कं

म॑ इषाण ॥६॥२॥

तदे॒वाग्निस्त॑दादि॒त्यस्त॒द्वा॒युस्त॒दु च॒न्द्रमाः॑ ।

त॒दे॒व शु॒क्रन्त॒द्ब्रह्म॒ तदाप॒स्तत्प्र॒जाप॑तिः ॥१॥

सर्वे॒ नि॒मेषा॑ ज॒ज्ञिरे॑ वि॒द्युतः॒ प्पुरु॑षा॒दधि॑ ।

नैन॑मू॒र्ध्वन्न ति॒र्यञ्च॒न्न मध्ये॒ परि॑ जग्रभत् ॥२॥

न तस्य प्रतिमा अस्ति यस्य नाम महद्यशः ।
हिरण्यगर्भ इत्येषः ॥३॥
एषो ह देवः प्रदिशोऽनु सर्वाः पूर्वो ह जातः स उ गर्भे अन्तः ।
स एव जातः स जनिष्यमाणः प्रत्यङ् जनास्तिष्ठति
सर्वतोमुखः । यस्मान्न जात इत्येषः ॥४॥
वेनस्तत्पश्यन्निहितङ्गुहा सद्यत्र विश्वं भवत्येकनीळम् ।
तस्मिन्निदꣳ सञ्च वि चैति सर्वꣳ स ओतः प्रोतश्च
विभूः प्रजासु ॥५॥
प्रतद्वोचेदमृतन्नु विद्वान्गन्धर्वो धाम विभृतङ्गुहा सत् ।
त्रीणि पदानि निहिता गुहास्य यस्तानि वेद स पितुः
पितासत् ॥६॥
स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा ।
यत्र देवा अमृतमानशानास्तृतीये धामन्नध्यैरयन्त ॥७॥

परीत्य भूतानि परीत्य लोकान्परीत्य सर्वाः प्प्रदिशो दिशश्च ।
उपस्थाय प्रथमजामृतस्यात्मनात्मानमभि सँ विवेश ॥८॥
परि द्यावापृथिवी सद्य इत्वा परि लोकान् परि दिशः प्परि स्वः ।
ऋतस्य तन्तुँ विततँ विचृत्य तदपश्यत्तदभवत्तदासीत् ॥९॥
सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् ।
सनिं मेधामयासिषꣳ स्वाहा ॥१०॥
यां मेधान्देवगणाः प्पितरश्चोपासते ।
तयामामद्य मेधयाग्ने मेधाविनङ्कुरु स्वाहा ॥११॥
इदं मे ब्रह्म च क्षत्रञ्चोभे श्रियमश्नुताम् ।
मयि देवा दधतु श्रियमुत्तमान्तस्यै ते स्वाहा ॥१२॥३॥

इति पुरुषसूक्तम् ॥

## अथ महाशान्तिसूक्तम् ॥

ऋचँ व्वाचं प्रपद्ये मनो यजुः प्प्रपद्ये साम प्राणं प्रपद्ये

चक्षुः श्रोत्रं प्रपद्ये । वागोजः सहोजो मयि प्राणापानौ ॥१॥

यन्मे च्छिद्रञ्चक्षुषो हृदयस्य मनसो वाति तृण्णं बृहस्पतिर्मे

तद्दधातु । शन्नो भवतु भुवनस्य यस्पतिः ॥२॥

भूर्भुवः स्वः । तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।

धियो यो नः प्रचोदयात् ॥३॥

कया नश्चित्र आ भुवदूती सदावृधः सखा ।

कया शचिष्ठया वृता ॥४॥

कस्त्वा सत्यो मदानां मꣳहिष्ठो मत्सदन्धसः ।

दृह्ळा चिदारुजे वसु ॥५॥

अभी षु णः सखीनामविता जरितॄणाम् ।

शतं भवास्यूतिभिः ॥६॥

कया त्वन्न ऊत्याभि प्र मन्दसे वृषन् । कया स्तोतृभ्य आ भर ॥७॥

इन्द्रो विश्वस्य राजति । शन्नो अस्तु द्विपदे शञ्चतुष्पदे ॥८॥

शन्नो मित्रः शँ व्वरुणः शन्नो भवत्वर्यमा ।

शन्न इन्द्रो बृहस्पतिः शन्नो विष्णुरुरुक्रमः ॥९॥

शन्नो वातःप्पवता॒ शन्नस्तपतु सूर्यः ।

शन्नः क्कनिक्रदद्देवः प्पर्जन्यो अभि वर्षतु ॥१०॥

अहानि शं भवन्तु नः श॒ रात्रिःप्प्रति धीयताम् ।

श न्न इन्द्राग्नी भवतामवोभिः शन्न इन्द्रावरुणा रातहव्या ।

शन्न इन्द्रापूषणा वाजसातौ शमिन्द्रासोमा सुविताय शँ य्योः ॥११॥

शन्नो देवीरभिष्टय आपो भवन्तु पीतये ।

शँ य्योरभि स्रवन्तु नः ॥१२॥

स्योना पृथिवि नो भवानृक्षरा निवेशनी ।

यच्छा नः शर्म सप्रथाः॥१३॥

आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन ।
महे रणाय चक्षसे ॥१४॥
यो वः शिवतमो रसस्तस्य भाजयतेह नः ।
उशतीरिव मातरः ॥१५॥
तस्मा अरङ्गमाम वो यस्य क्षयाय जिन्वथ ।
आपो जनयथा च नः॥१६॥
द्यौः शान्तिरन्तरिक्ष७ँ शान्तिः पृथिवी शान्तिरापः
शान्तिरोषधयः शान्तिः । वनस्पतयः शान्तिः शान्तिरेव
शान्तिः ॥१७॥
दृते दृ७ँह मा मित्रस्य मा चक्षुषा सर्वाणि भूतानि
समीक्षन्ताम् । मित्रस्याहञ्चक्षुषा सर्वाणि भूतानि समीक्षे ।
मित्रस्य चक्षुषा समीक्षामहे ॥१८॥
दृते दृ७ँह मा ।

ज्योक्के सन्दृशि जीव्यासञ्ज्योक्के सन्दृशि जीव्यासम् ॥१९॥
नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे । अन्याँऽस्ते
अस्मत्तपन्तु हेतयः प्पावको अस्मभ्यꣳ शिवो भव ॥२०॥
नमस्ते अस्तु विद्युते नमस्ते स्तनयित्नवे ।
नमस्ते भगवन्नस्तु यतः स्वः समीहसे ॥२१॥
यतो यतः समीहसे ततो नो अभयङ्कुरु ।
शन्नः कुरु प्रजाभ्योऽभयन्नः प्पशुभ्यः ॥२२॥
सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु ।
योऽस्मान्द्वेष्टि यञ्च वयन्द्विष्मः ॥२३॥
तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः
शतञ्जीवेम शरदः शतꣳ शृणुयाम शरदः शतम् ॥२४॥

इति महाशान्तिसूक्तम् ॥

## अथ ईशावास्योपनिषत् ॥

ॐ३ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥
ॐ३ शान्तिःशान्तिःशान्तिः॥

ईशावास्यमिद९ सर्वं य्यत्किञ्च जगत्याञ्जगत् ।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद्धनं ॥१॥
कुर्वन्नेवेह कर्माणि जिजीविशेच्छत९ समाः ।
एवन्त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥२॥
असुर्या नाम ते लोका अन्धेन तमसावृताः ।
ता९स्ते प्रेत्याभि गच्छन्ति ये के चात्महनो जनाः ॥३॥
अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन् पूर्वमर्षत् ।
तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति ॥४॥
तदेजति तन्नेजति तद्दूरे तद्वन्तिके ।

तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः ॥५॥

यस्तु सर्वाणि भूतान्यात्मन्नेवानुपश्यति ।

सर्वभूतेषु चात्मानन्ततो न वि जुगुप्सते ॥६॥

यस्मिन्त्सर्वाणि भूतान्यात्मैवाभूद्विजानतः ।

तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥७॥

स पर्यगाच्छुक्रमकायमव्रणमस्नाविरꣳ शुद्धमपापविद्धम् ।

कविर्मनीषी परिभूः स्वयंभूर्याथातथ्यतोऽर्थान्

व्यदधाच्छाश्वतीभ्यः समाभ्यः ॥८॥

अन्धन्तमः प्र विशन्ति येऽविद्यामुपासते ।

ततो भूयइव ते तमो य उ विद्यायाꣳ रताः ॥९॥

अन्यदेवाहुर्विद्ययान्यदाहुरविद्यया ।

इति शुश्रुम धीराणाँ य्येनस्तद्विचचक्षिरे ॥१०॥

विद्याञ्चाविद्याञ्च यस्तद्वेदोभयꣳ सह ।

अविद्यया मृत्युन्तीर्त्वा विद्ययामृतमश्नुते ॥११॥

अन्धन्तमः प्र विशन्ति येऽसंभूतिमुपासते ।

ततो भूयइव ते तमो य उ संभूत्या॑ रताः ॥१२॥

अन्यदेवाहुः संभवादन्यदाहुरसंभवात् ।

इति शुश्रुम धीराणाँ य्येनस्तद्विचचक्षिरे ॥१३॥

संभूतिञ्च विनाशञ्च यस्तद्वेदोभय॑ सह ।

विनाशेन मृत्युन्तीर्त्वा संभूत्यामृतमश्नुते ॥१४॥

ह्रिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।

तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ॥१५॥

पूषन्नेकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन्त्समूह तेजो

यत्ते रूपङ्कल्याणतमन्तत्ते पश्यामि ।

योऽसावसौ पुरुषस्सोऽहमस्मि ॥१६॥

वायुरनिलममृतमथेदं भस्मान्त॑ शरीरं ।

ॐ३ क्रतो स्मर कृतꣳ स्मर क्रतो स्मर कृतꣳ स्मर ॥१७॥

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठान्ते नमउक्तिं विधेम ॥१८॥

ॐ३ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।
ॐ३ शान्तिःशान्तिःशान्तिः॥

इति ईशावास्योपनिषत् ॥

## अथ विष्णुसूक्तम् ॥

युञ्जते मनं उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः ।
वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः ॥१॥

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ।
समूह्ळमस्य पाꣳसुरे स्वाहा ॥२॥

इरावती धेनुमती हि भूतꣳ सूयवसिनी मनवे दशस्या । व्यस्कभ्ना
रोदसी विष्ण एते दाधर्थ पृथिवीमभितो मयूखैः स्वाहा ॥३॥

देवश्रुतौ देवेष्वा घोषतम् । प्राची प्रेतमध्वरङ्कल्पयन्ती
ऊर्ध्वँय्यज्ञन्नयतं मा जिह्वरतम् ॥४॥

स्वङ्गोष्ठमावदतन्देवी दुर्ये आयुर्मा निर्वादिष्टं प्रजां मा
निर्वादिष्टम् । अत्र रमेथाँ व्वर्ष्मन् पृथिव्याः ॥५॥

विष्णोर्नु कँ व्वीर्याणि प्रवोचँ व्यः प्पार्थिवानि विममे रजाꣳसि ।
यो अस्कभायदुत्तरꣳ सधस्थँ व्विचक्रमाणस्त्रेधोरुगायो

विष्णवे त्वा ॥६॥

दिवो वा विष्ण उत वा पृथिव्या महो वा विष्ण

उरोरन्तरिक्षात् । उभा हि हस्ता वसुना पृणस्वा प्र यच्छ

दक्षिणादोत सव्याद्विष्णवे त्वा ॥७॥

प्रतद्विष्णुस्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः ।

यस्योरेषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ॥८॥

विष्णो रराटमसि विष्णो श्नप्त्रे स्थो विष्णो स्यूरसि

विष्णोर्ध्रुवोऽसि । वैष्णवमसि विष्णवे त्वा ॥९॥

इति विष्णुसूक्तम् ॥

## अग्निसूक्तम् ॥

ॐ समास्त्वाग्न ऋतवो वर्धयन्तु सँव्वत्सरा ऋषयो यानि सत्या।
सन्दिव्येन दीदिहि रोचनेन विश्वा आभाहि प्रदिशश्चतस्रः ॥१॥
सञ्चेध्यस्वाग्ने प्र च बोधयैनमुच्च तिष्ठ महते सौभगाय ।
मा च रिषदुपसत्ता ते अग्ने ब्रह्माणस्ते यशसस्सन्तु मान्ये ॥२॥
त्वामग्ने वृणते ब्राह्मणा इमे शिवो अग्ने सँ व्वरणे भवा नः।
सपत्नहा नो अभिमातिजिच्च स्वे गये जागृह्यप्रयुच्छन् ॥३॥
इहैवाग्ने अधि धारया रयिं म त्वा निक्रन् पूर्वचितो निकारिणः।
क्षत्रमग्ने सुयममस्तु तुभ्यमुपसत्ता वर्धतान्ते अनिष्टृतः ॥४॥
क्षत्रेणाग्ने स्वायुस्सꣳ रभस्व मित्रेणाग्ने मित्रधेये यतस्व ।
सजातानां मध्यमस्था एधि राज्ञामग्ने विहव्यो दीदिहीह ॥५॥
अति निहो अति स्रिधोऽत्यचित्तिमत्यरातिमग्ने ।
विश्वा ह्यग्ने दुरिता सहस्वाथास्मभ्यꣳ सहवीरꣳ रयिन्दाः ॥६।

अनाधृष्यो जातवेदा अनिष्टृतो विराळग्ने क्षत्रभृद्दीदिहीह ।
विश्वा आशाः प्रमुञ्चन्मानुषीर्भियः शिवेभिरद्य परि
पाहि नो वृधे ॥७॥

बृहस्पते सवितर्बोधयैन॑ सꣳशितञ्चित्सन्तराꣳ सꣳ शिशाधि।
वर्धयैनं महते सौभगाय विश्व एनमनुमदन्तु देवाः ॥८॥

अमुत्रभूयादथ यद्यमस्य बृहस्पते अभिशस्तेरमुञ्चः ।
प्रत्यौहतामश्विना मृत्युमस्माद्देवानामग्ने भिषजा शचीभिः ॥९॥

उद्वयन्तमसस्परि स्वः पश्यन्त उत्तरम् ।
देवन्देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥१०॥

इति अग्निसूक्तम् ॥

## अथ वात्सप्रसूक्तम् ॥

दिवस्परि प्रथमञ्जज्ञे अग्निरस्मद्द्वितीयं परि जातवेदाः ।
तृतीयमप्सु नृमणा अजस्रमिन्धान एनञ्जरते स्वाधीः ॥१॥
विद्या ते अग्ने त्रेधा त्रयाणि विद्या ते धाम विभृता पुरुत्रा ।
विद्या ते नाम परमङ्गुहा यद्विद्या तमुत्सँ यत आजगन्थ ॥२॥
समुद्रे त्वा नृमणा अप्स्वन्तर्नृचक्षा ईधे दिवो अग्न ऊधन् ।
तृतीयेत्वा रजसि तस्थिवाᳬसमपामुपस्थे महिषा अवर्द्धन् ॥३॥
अक्रन्ददग्नि स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन् ।
सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः॥४॥
श्रीणामुदारो धरुणो रयीणां मनीषाणां प्रार्पणः सोमगोपाः ।
वसुःसूनुः सहसो अप्सु राजा विभात्यग्र उषसामिधानः ॥५॥
विश्वस्य केतुर्भुवनस्य गर्भ आ रोदसी अपृणाज्जायमानः ।
वीळुञ्चिदद्रिमभिनत्परायञ्जना यदग्निमयजन्त पञ्च ॥६॥

उशिक्पावको अरतिः सुमेधा मर्तेष्वग्निरमृतो नि धायि ।
इयर्ति धूममरुषं भरिभ्रदुच्छुक्रेण शोचिषा द्यामिनक्षन् ॥७॥
दृशानो रुक्म उर्व्या व्यद्यौदुर्मर्षमायुः श्रिये रुचानः ।
अग्निरमृतो अभवद्वयोभिर्यदेनन्द्यौरजनयत्सुरेताः ॥८॥
यस्ते अद्य कृणवद्भद्रशोचेऽपूपन्देव घृतवन्तमग्ने ।
प्रतन्नय प्रतरँ वस्यो अच्छाभि सुम्नन्देवभक्तँ यविष्ठ ॥९॥
आ तं भज सौश्रवसेष्वग्न उक्थउक्थ आभज शस्यमाने ।
प्रियः सूर्ये प्रियो अग्ना भवात्युज्जातेन भिनददुज्जनित्वैः ॥१०॥
त्वामग्ने यजमाना अनु द्यून्विश्वा वसु दधिरे वार्याणी ।
त्वया सह द्रविणमिच्छमाना व्रजङ्गोमन्तमुशिजो विवव्रुः ॥११॥
अस्ताव्यग्निर्नरा९ सुशेवो वैश्वानर ऋषिभिः सोमगोपाः ।
अद्वेशे द्यावापृथिवी हुवेम देवा धत्त रयिमस्मे सुवीरम् ॥१२॥

इतिवात्सप्रसूक्तम् ॥

अथाथिश्रवणमन्त्राः ॥

ॐ भूर्भुवः स्वः । तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।
धियो यो नः प्रचोदयात् ॥

कृणुष्व पाजः प्रसितिन्न पृथ्वीँ याहि राजेवामवाँ इभेन ।
तृष्वीमनु प्रसीतिन्द्रूणानोऽस्तासि विध्य रक्षसस्तपिष्ठैः ॥
तव भ्रमास आशुया पतन्त्यनु स्पृश धृषता शोशुचानः ।
तपूꣳष्यग्ने जुह्वा पतङ्गानसन्दितो विसृज विष्वगुल्काः ॥
प्रति स्पशो वि सृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धः।
यो नो दूरे अघशꣳसो यो अन्त्यग्ने माकिष्टे व्यथिरादधर्षीत् ॥
उदग्ने तिष्ठ प्रत्यातनुष्व न्यमित्राँ ओषतात्तिग्महेते ।
यो नो अरातिꣳ समिधान चक्रे नीचा तन्धक्ष्यतसन्न शुष्कम् ॥
ऊर्ध्वो भव प्रति विध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने ।
अव स्थिरा तनुहि यातुजानाञ्जामिमजामि प्र मृणीहि शत्रून् ॥

सुरावन्तं बर्हिषद॑ सुवीरँ यज्ञ॑ हिन्वन्ति महिषा नमोभिः ।
दधानाः सोमन्दिवि देवतासु मदेमेन्द्रँ यजमानाः स्वर्काः ॥१॥
यस्ते रसः सम्भृत ओषधीषु सोमस्य शुष्मः सुरया सुतस्य ।
तेन जिन्व यजमानं मदेन सरस्वतीमश्विना इन्द्रमग्निम् ॥२॥
यमश्विना नमुचेरासुरादधि सरस्वत्यसुनोदिन्द्रियाय । इमन्त॑
शुक्रं मधुमन्तमिन्दु॑ सोम॑ राजानमिह भक्षयामि ॥३॥
यदत्र रिप्त॑ रसिनः सुतस्य यदिन्द्रो अपिबच्छचीभिः ।
अहन्तदस्य मनसा शिवेन सोम॑ राजानमिह भक्षयामि ॥४॥
पितृभ्यः स्वधायिभ्यः स्वधा नमः प्पितामहेभ्यः स्वधायिभ्यः
स्वधा नमः । प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः ॥५॥
अक्षन् पितरोऽमीमदन्त पितरोऽतीतृपन्त पितरः ।
पितरः शुन्धध्वम् ॥६॥
पुनन्तु मा पितरः सोम्यासः प्पुनन्तु मा पितामहाः प्पुनन्तु

प्रपितामहाः । पवित्रेण शतायुषा ॥७॥

पुनन्तु मा पितामहाः प्पुनन्तु प्रपितामहाः ।

पवित्रेण शतायुषा विश्वमायुर्व्यश्नवै ॥८॥

अग्न आयू॔ᳶषि पवस आ सुवोर्जमिषञ्च नः ।

आरे बाधस्व दुच्छुनाम् ॥९॥

पुनन्तु मा देवजनाः प्पुनन्तु मनसा धियः ।

पुनन्तु विश्वा भूतानि जातवेदः प्पुनीहि मा ॥१०॥

पवित्रेण पुनीहि मा शुक्रेण देव दीद्यत् ।

अग्ने क्रत्वा क्रतू॔ᳶरनु ॥११॥

यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा । ब्रह्म तेन पुनातु मा ॥१२॥

पवमानः सो अद्य नः प्पवित्रेण विचर्षणिः ।

यः प्पोता स पुनातु मा ॥१३॥

उभाभ्यान्देवसवितः प्पवित्रेण सवेन च । मां पुनीहि विश्वतः ॥१४॥

वैश्वदेवी पुनाती देव्यागाद्यस्यामिमा बह्व्यस्तन्वो वीतपृष्ठाः ।
तया मदन्तः सधमादेषु वयᳪ स्याम पतयो रयीणाम् ॥१५॥
ये समानाः समनसः प्पितरो यमराज्ये ।
तेषाँ ल्लोकः स्वधा नमो यज्ञो देवेषु कल्पताम् ॥१६॥
ये समानाः समनसो जीवा जीवेषु मामकाः । तेषाᳪ
श्रीर्मयि कल्पतामस्मिँल्लोके शतᳪ समाः ॥१७॥
द्वे सृती अशृणवं पितृणामहन्देवानामुत मर्त्यानाम् ।
ताभ्यामिदँ व्विश्वमेजत्समेति यदन्तरा पितरं मातरञ्च ॥१८॥
इदᳪ हविः प्रजननं मे अस्तु दशवीरᳪ सर्वगणᳪ स्वस्तये ।
आत्मसनि प्रजासनि पशुसनि लोकसन्यभयसनि ।
अग्निः प्रजां बहुलां मे करोत्वन्नं पयो रेतो अस्मासु धत्त ॥१९॥

उदीरतामवर उत्परास उन्मध्यमाः प्पितरः सोम्यासः ।

असुँ य्य ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु ॥१॥

त्व९ सोम प्रचिकितो मनीषा त्व९ रजिष्ठमनु नेषि पन्थाम् ।
तव प्रणीती पितरो न इन्दो देवेषु रत्नमभजन्त धीराः ॥२॥

त्वया हि नः प्पितरः सोम पूर्वे कर्माणि चक्रुः प्पवमानधीराः।
वन्वन्नवातः प्परिधी९रपोर्णु वीरेभिरश्वैर्मघवा भवा नः ॥३॥

त्व९ सोम पितृभिः सँव्विदानोऽनु द्यावापृथिवी आ ततन्थ ।
तस्मै त इन्दो हविषा विधेम वय९ स्याम पतयो रयीणाम् ॥४॥

बर्हिषदः प्पितर ऊत्यर्वागिमा वो हव्या चकृमा जुषध्वम् ।
त आगतावसा शन्तमेनाथा नः शँ य्योररपो दधात ॥५॥

उपहूताः प्पितरः सोम्यासो बर्हिष्ष्येषु निधिषु प्रियेषु ।
त आगमन्तु त इह श्रुवन्त्वधि ब्रुवन्तु तेऽवन्त्वस्मान् ॥६॥

आहं पितॄन्त्सुविदत्राँ अवित्सि नपातञ्च विक्रमणञ्च विष्णोः।
बर्हिषदो ये स्वधया सुतस्य भजन्त पित्वस्त इहागमिष्ठाः ॥७॥

अग्निष्वात्ताः प्पितर एह गच्छत सदःसदः सदत सुप्रणीतयः ।
अत्ता हवीᳬंषि प्रयतानि बर्हिष्यथा रयिᳬं सर्ववीरन्दधातन ॥८॥
आयन्तु नः प्पितरः सोम्यासोऽग्निष्वात्ताः प्पथिभिर्देवयानैः ।
अस्मिन् यज्ञे स्वधया मदन्तोऽधि ब्रुवन्तु तेऽवन्त्वस्मान् ॥९॥
ये अग्निष्वात्ता ये अनग्निष्वात्ता मध्ये दिवः स्वधया मादयन्ते ।
तेभ्यः स्वराळसुनीतिमेतां य्यथावशन्तन्वङ्कल्पयाति ॥१०॥
अग्निष्वात्तानृतुमतो हवामहे नाराशᳬंसे सोमपीथं य्य आशुः ।
ते नो विप्रासः सुहवा भवन्तु वयᳬं स्याम पतयो रयीणाम् ॥११॥
आच्या जानु दक्षिणतो निषद्येमं य्यज्ञमभि गृणीत विश्वे ।
मा हिᳬंसिष्ट पितरः केन चिन्नो यद्व आगः प्पुरुषता कराम ॥१२॥
आसीनासो अरुणीनामुपस्थे रयिन्धत्त दाशुषे मर्त्याय ।
पुत्रेभ्यः प्पितरस्तस्य वस्वः प्र यच्छत त इहोर्जन्दधात ॥१३॥
यमग्ने कव्यवाहन त्वञ्चिन्मन्यसे रयिम् ।

तन्नो गीर्भिः श्रवाय्यन्देवत्रा पनया युजम् ॥१४॥
यो अग्निः कव्यवाहनः पितृन् यक्षदृतावृधः ।
प्रेदु हव्यानि वोचति देवेभ्यश्च पितृभ्य आ ॥१५॥
त्वमग्न ईळितो जातवेदोऽवाड्ढव्यानि सुरभीणि कृत्वी । प्रादाः
पितृभ्यः स्वधया ते अक्षन्नद्धि त्वन्देव प्रयता हवीᳪंषि ॥१६॥
इदं पितृभ्यो नमो अस्त्वद्य ये पूर्वासो य उपरास ईयुः ।
ये पार्थिवे रजस्या निषत्ता ये वा नूनᳪं सुवृजनासु विक्षु ॥१७॥
ये चेह पितरो ये च नेह याᳪंश्च विद्म याँ उ च न प्रविद्म ।
त्वँ वेत्थ यति ते जातवेदः स्वधाभिर्यज्ञᳪं सुकृतञ्जुषस्व ॥१८॥
अधा यथा नः पितरः परासः प्रत्नासो अग्न
ऋतमाशुषाणाः । शुचीदयन्दिधीतिमुक्थशासः क्षामा
भिन्दन्तो अरुणीरप व्रन् ॥१९॥
उशन्तस्त्वा नि धीमह्युशन्तः समिधीमहि ।

उशन्तुशत आवह पितॄन् हविषे अत्तवे ॥२०॥

अपां फेनेन नमुचेः शिर इन्द्रोदवर्तयः ।
विश्वा यदजय स्पृधः ॥२१॥

सोमो राजामृत७ँ सुत ऋजीषेणाजहान्मृत्युम् ।
ऋतेन सत्यमिन्द्रियँ व्विपान७ँ शुक्रमन्धस
इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥१॥

अभ्यः क्षीरँ व्यपिबत्कृङ्ङाङ्गिरसो धिया ।
ऋतेन सत्यमिन्द्रियँ व्विपान७ँ शुक्रमन्धस
इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ।
सोममद्भ्यो व्यपिबच्छन्दसा ह७ँसः शुचिषत् ।
ऋतेन सत्यमिन्द्रियँ व्विपान७ँ शुक्रमन्धस
इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु । अन्नात्परिस्रुतो रस

ब्रह्मणा व्यपिबत्क्षत्रं पयः सोमं प्रजापतिः ।
ऋतेन सत्यमिन्द्रियँ विपानꣳ शुक्रमन्धस
इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥२॥
रेतो मूत्रँ विजहाति योनिं प्रविशदिन्द्रियम् ।
गर्भो जरायुणावृत उल्बञ्जहाति जन्मना ।
ऋतेन सत्यमिन्द्रियँ विपानꣳ शुक्रमन्धस
इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥३॥
दृष्ट्वा रूपे व्याकरोत् सत्यानृते प्रजापतिः ।
अश्रद्धामनृते दधाच्छ्रद्धाꣳ सत्ये प्रजापतिः ।
ऋतेन सत्यमिन्द्रियँ विपानꣳ शुक्रमन्धस
इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥४॥
वेदेन रूपे व्यपिबत्सुतासुतौ प्रजापतिः ।
ऋतेन सत्यमिन्द्रियँ विपानꣳ शुक्रमन्धस

इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ।
दृष्ट्वा परिस्रुतो रसꣳ शुक्रेण शुक्रं व्यपिबत्पयः सोमं
प्रजापतिः । ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धस
इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥५॥

कः स्विदेकाकी चरति क उ स्विज्जायते पुनः ।
किꣳ स्विद्धिमस्य भेषजङ्किम्वावपनं महत् ॥१॥
सूर्य एकाकी चरति चन्द्रमा जायते पुनः ।
अग्निर्हिमस्य भेषजं भूमिरावपनं महत् ॥२॥
किꣳ स्वित् सूर्यसमञ्ज्योतिः किꣳ समुद्रसमꣳ सरः ।
किꣳ स्वित् पृथिव्यै वर्षीयः कस्य मात्रा न विद्यते ॥३॥
ब्रह्म सूर्यसमञ्ज्योतिर्द्यौः समुद्रसमꣳ सरः ।
इन्द्रः पृथिव्यै वर्षीयान् गोस्तु मात्रा न विद्यते ॥४॥

पृच्छामि त्वा चितये देवसख यदि त्वमत्र मनसा जगन्थ ।
येषु विष्णुस्त्रिषु पदेष्वेष्टस्तेषु विश्वं भुवनमा विवेशा३ ॥५॥
अपि तेषु त्रिषु पदेष्वस्मि येषु विश्वं भुवनमाविवेश ।
सद्यः प्पर्येमि पृथिवीमुत द्यामेकेनाङ्गेन दिवो अस्य पृष्ठम् ॥६॥
केष्वन्तः प्पुरुष आ विवेश कान्यन्तः प्पुरुषे अर्पितानि ।
एतद्ब्रह्मन्नुप वल्हामसि त्वा किं स्विन्नः प्रति वोचास्यत्र ॥७॥
पञ्चस्वन्तः प्पुरुष आविवेश तान्यन्तः प्पुरुषे अर्पितानि ।
एतत्वात्र प्रतिमन्वानो अस्मि न मायया भवस्युत्तरो मत् ॥८॥

का स्विदासीत् पूर्वचित्तिः किं स्विदासीद्बृहद्वयः ।
का स्विदासीत् पिलिप्पिला का स्विदासीत् पिशङ्गिला ॥१॥
द्यौरासीत् पूर्वचित्तिरश्व आसीद्बृहद्वयः ।
अविरासीत् पिलिप्पिला रात्रिरासीत् पिशङ्गिला ॥२॥

का ईमरे पिशङ्गिला का ईङ्कुरुपिशङ्गिला ।
क ईमास्कन्दमर्षति क ईं पन्थाँ व्विसर्पति ॥३॥
अजारे पिशङ्गिला श्वावित् कुरुपिशङ्गिला ।
शश आस्कन्दमर्षत्यहिः प्पन्थाँ व्वि सर्पति ॥४॥
कत्यस्य विष्ठाः कत्यक्षराणि कति होमासः कतिधा समिद्धः ।
यज्ञस्य त्वा विदथा पृच्छमत्र कति होतार ऋतुशो यजन्ति ॥५॥
षळस्य विष्ठाः शतमक्षराण्यशीतिर्होमाः समिधो ह तिस्रः ।
यज्ञस्य ते विदथा प्र ब्रवीमि सप्त होतार ऋतुषो यजन्ति ॥६॥
को अस्य वेद भुवनस्य नाभिङ्को द्यावापृथिवी अन्तरिक्षम् ।
कः सूर्यस्य वेद बृहतो जनित्रङ्को वेद चन्द्रमसँ य्यतोजाः ॥७॥
वेदाहमस्य भुवनस्य नाभिँ व्वेद द्यावापृथिवी अन्तरिक्षम् ।
वेद सूर्यस्य बृहतो जनित्रमथो वेद चन्द्रमसँ य्यतोजाः ॥८॥
पृच्छामि त्वा परमन्तं पृथिव्याः पृच्छामि यत्र भुवनस्य नाभिः ।

पृच्छामि त्वा वृष्णो अश्वस्य रेतः पृच्छामि वाचः प्परमँ व्व्योम ॥९॥

इयँ व्वेदिः प्परो अन्तः पृथिव्या अयँ य्यज्ञो भुवनस्य नाभिः ।

अयꣳ सोमो वृष्णो अश्वस्य रेतो ब्रह्मायँ व्वाचः प्परमँ व्व्योम ॥१०॥

सुभूः स्वयम्भूः प्प्रथमोऽन्तर्महत्यर्णवे ।

दधे ह गर्भमृत्वियँ य्यतो जातः प्प्रजापतिः ॥११॥

होता यक्षत्प्रजापतिꣳ सोमस्य महिम्नः ।

जुषतां पिबतु सोमꣳ होतर्यज ॥१२॥

प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परि ता बभूव ।

यत्कामास्ते जुहुमस्तन्नो अस्तु वयꣳ स्याम पतयो रयीणाम् ॥१३॥

ॐआशुः शिशानो वृषभो न भीमो घनाघनः

क्षोभणश्चर्षणीनाम् । सङ्क्रन्दनोऽनिमिष एकवीरः शतꣳ

सेना अजयत्साकमिन्द्रः ॥१॥

सङ्क्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना ।
तदिन्द्रेण जयत तत्सहध्वँ युधो नर इषुहस्तेन वृष्णा ॥२॥
स इषुहस्तैः स निषङ्गिभिर्वशी सꣳस्रष्टा स युध इन्द्रो गणेन।
सꣳसृष्टजित् सोमपा बाहुशर्ध्युग्रधन्वा प्रतिहिताभिरस्ता ॥३॥
बृहस्पते परिदीया रथेन रक्षोहामित्राँ अपबाधमानः ।
प्रभञ्जन्त्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम् ॥४॥
बलविज्ञाय स्थविरः प्रवीरः सहस्वान्वाजी सहमान उग्रः ।
अभिवीरो अभिसत्वा सहोजा जैत्रमिन्द्र रथमा तिष्ठ गोवित् ॥५॥
गोत्रभिदङ्गोविदँ वज्रबाहुञ्जयन्तमज्म प्रमृणन्तमोजसा ।
इमꣳ सजाता अनु वीरयध्वमिन्द्रꣳ सखायो अनु सꣳरभध्वम् ॥६॥
अभि गोत्राणि सहसा गाहमानोऽदयो वीरः शतमन्युरिन्द्रः ।
दुश्च्यवनः पृतनाषाळ्युध्योऽस्माकꣳ सेना अवतु प्रयुत्सु ॥७॥
इन्द्र आसान्नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः।

देवसेनानामभिभञ्जतीनाञ्जयन्तीनां मरुतो यन्त्वग्रम ॥८॥

इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुताॅ शर्धउग्रम् ।

महामनसां भुवनच्यवानाङ्घोषो देवानाञ्जयतामुदस्थात् ॥९॥

उद्धर्षय मघवन्नायुधान्युत्सत्वनां मामकानां मनाॅसि ।

उद्वृत्रहन्वाजिनाँ व्वाजिनान्युद्रथानाञ्जयतां य्यन्तु घोषाः॥१०॥

अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकँ य्या इषवस्ता जयन्तु।

अस्माकँ व्वीरा उत्तरे भवन्त्वस्माँ उ देवा अवता हवेषु॥११॥

अमीषाञ्चित्तं प्रतिलोभयन्ती गृहाणाङ्गान्यप्वे परेहि ।

अभि प्रेहि निर्दह हृत्सु शोकैरन्धेनामित्रास्तमसा सचन्ताम् ॥१२॥

अवसृष्टा परापत शरव्ये ब्रह्म सॅशिते ।

गच्छामित्रान् प्र पद्यस्व मामीषाङ्कञ्चनोच्छिषः ॥१३॥

प्रेता जयता नर इन्द्रो वः शर्म यच्छतु ।

उग्रा वः सन्तु बाहवोऽनाधृष्या यथासथ ॥१४॥

असौ या सेना मरुतः प्परेषामभ्यैति न ओजसा स्पर्धमाना ।
ताञ्गूहत तमसापव्रतेन यथामी अन्यो अन्यन्न जानन् ॥१५॥
यत्र बाणाः सपतन्ति कुमारा विशिखा इव । तत्र इन्द्रो
बृहस्पतिरदितिः शर्म यच्छतु विश्वाहा शर्म यच्छतु ॥१६॥
मर्माणि ते वर्मणा च्छादयामि सोमस्त्वा राजामृतेनानु
वस्ताम् । उरोर्वरीयो वरुणस्ते कृणोतु जयन्तन्त्वानु देवा
मदन्तु ॥१७॥

## अथ पूर्णाहुतिसूक्तम् ॥

ॐ पूर्णा दर्वि परा पत सुपूर्णा पुनरापत ।
वस्नेव वि क्रीणावहा इषमूर्ज॑ꣳ शतक्रतो ॥१॥
देहि मे ददामि ते नि मे धेहि नि ते दधौ ।
निहारन्नि हरामि ते निहारन्नि हरासि मे स्वाहा ॥२॥

ॐ सप्त ते अग्ने समिधःसप्त जिह्वाःसप्त ऋषयःसप्त धाम प्रियाणि । सप्त होत्राः सप्तधा त्वा यजन्ति सप्त योनीरापृणस्व घृतेन स्वाहा ॥

ॐ शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्माꣳश्च । शुक्रश्च ऋतपाश्चात्यꣳहाः ॥१॥
ईदृङ्चान्यादृङ्च सदृङ्च प्रतिसदृङ्च ।
मितश्च सम्मितश्च सभराः ॥२॥
ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्च ।

अन्तिमित्रश्च दूरेअमित्रश्च गणः ॥३॥

ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च ।

धर्ता च विधर्ता च विधारयः ॥४॥

ईदृक्षास एतादृक्षास ऊषुणः सदृक्षासः प्रतिसदृक्षास एतन ।

मितासश्च सम्मितासो नो अद्य सभरसो मरुतो यज्ञे अस्मिन् ॥५॥

स्वतवाँश्च प्रघासी च सान्तपनश्च गृहमेधी च ।

क्रीळी च शाकी चोज्जेषी ॥६॥

इन्द्रन्दैवीर्विशो मरुतोऽनुवर्त्मानोऽभवन्यथेन्द्रन्दैवीर्विशो

मरुतोऽनुवर्त्मानोऽभवन् । एवमिमँ य्यजमानन्दैवीश्च

विशो मानुषीश्चानुवर्त्मानो भूयासुः ॥७॥

## अथ सूर्यसूक्तम् ॥

विभ्राड् बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपता अविह्रुतम् ।
वातजूतो यो अभिरक्षति त्मना प्रजाः पुपोष पुरुधा विराजति ॥१॥

उ दु त्यञ्जातवेदसन्देवँ व्वहन्ति केतवः ।
दृशे विश्वाय सूर्यम् ॥२॥

येना पावक चक्षसा भुरण्यन्तञ्जनाँ अनु ।
त्वँ व्वरुण पश्यसि ॥३॥

दैव्या अध्वर्यू आगतꣳ रथेन सूर्यत्वचा । मध्वा यज्ञꣳ
समञ्जाथे । तं प्रत्नथायँ व्वेनश्चोदयच्चित्रन्देवानाम् ॥४॥

आ न इळाभिर्विदथे सुशस्ति विश्वानरः सविता देव एतु ।
अपि यथा युवानो मत्सथा नो विश्वञ्जगदभिपित्वे मनीषा ॥५॥

यदद्य कच्च वृत्रहन्नुदगा अभि सूर्य । सर्वन्तदिन्द्र ते वशे ॥६॥

तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य ।

विश्वमा भासि रोचनम् ॥७॥

तत्सूर्यस्य देवत्वन्तन्महित्वं मध्या कर्त्तोर्विततᳪ सञ्जभार ।

यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै ॥८॥

तन्मित्रस्य वरुणस्याभिचक्षे सूर्यो रूपङ्कृणुते द्योरुपस्थे ।

अनन्तमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितः संभरन्ति ॥९॥

बण्महाँ असि सूर्य बळादित्य महाँ असि ।

महस्ते सतो महिमा पनस्यतेऽद्धा देव महाँ असि ॥१०॥

बट् सूर्य श्रवसा महाँ असि सत्रा देव महाँ असि ।

मह्ना देवानामसुर्यः पुरोहितो विभु ज्योतिरदाभ्यम् ॥११॥

श्रायन्तइव सूर्यं विश्वेदिन्द्रस्य भक्षत ।

वसूनि जाते जनमान ओजसा प्रति भागन्न दीधिम ॥१२॥

अद्या देवा उदिता सूर्यस्य निरᳪहसः पिपृता निरवद्यात् ।

तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥१३॥

आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥१४॥
उद्वयं तमसस्परि स्वः प्पश्यन्त उत्तरम् ।
देवन्देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥१५॥

ॐ अदृश्रमस्य केतवो वि रश्मयो जनाँ अनु । भ्राजन्तो अग्नयो यथा । उपयामगृहीतोऽसि सूर्याय त्वा भ्राज एष ते योनिः सूर्याय त्वा भ्राजे । सूर्य भ्राजस्वन् भ्राजस्वाᳫँस्त्वन्देवेष्वसि । भ्राजस्वानहं मनुष्येषु भूयासम् ॥
ॐउदुत्यञ्जातवेदसन्देवँ व्वहन्ति केतवः । दृशे विश्वाय सूर्यम् । उपयामगृहीतोऽसि सूर्याय त्वा भ्राज एष ते योनिः सूर्याय त्वा भ्राजे । सूर्य भ्राजस्वन् भ्राजस्वाᳫँस्त्वन्देवेष्वसि । भ्राजस्वानहं मनुष्येषु भूयासम् ॥

चित्रन्देवानामुदगादनीकञ्चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आ प्रा द्यावापृथिवी अन्तरिक्षꣳसूर्य आत्मा जगतस्तस्थुषश्च ।
उपयामगृहीतोऽसि सूर्याय त्वा भ्राज एष ते योनिः सूर्याय
त्वा भ्राजे । सूर्य भ्राजस्वन् भ्राजस्वाꣳस्त्वन्देवेष्वसि ।
भ्राजस्वानहं मनुष्येषु भूयासम् ॥

ॐ मित्रस्य चर्षणीधृतोऽवो देवस्य सानसि ।
द्युम्नञ्चित्रश्रवस्तमम् ॥

ॐ हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता
वेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जा
गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥

ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः
शतञ्जीवेम शरदः शतꣳ शृणुयाम शरदः शतम् ॥

अथाभ्यारोहजपः ॥

ॐ अथातः पवमानानामेवाभ्यारोहस्स वै खलु प्रस्तोता साम प्रस्तौति स यत्र प्रस्तुयात्तदेतानि जपेदसोतो मा सद्गमय तमसो मा ज्योतिर्गमय मृत्योर्माऽमृतङ्गमयेति स यदाहासतो मा सद्गमयेति मृत्युर्वा असत्सदमृतं मृत्योर्माऽमृतं गमयामृतं मा कुर्वित्त्येवैतदाह तमसो मा ज्योतिर्गमयेति मृत्युर्वै तमो ज्योतिरमृतं मृत्योर्माऽमृतं गमयाऽमृतं मा कुर्वित्त्येवैतदाह मृत्योर्माऽमृतङ्गमयेति नात्र तिरोहितमिवास्त्यथ यानीतराणि स्तोत्राणि तेष्वात्मनेऽन्नाद्यमागायेत्तस्मादु तेषु वरं वृणित यं कामङ्कामयेत त७ स एष एवं विदुद्गातात्मने वा यजमानाय वा यङ्कामङ्कामयते तमागायति तद्धैतल्लोकजिदेव नहैवाऽलोक्यताया आशास्ति य एवमेतत्साम वेद ॥

इत्यभ्यारोहजपः ॥

अथ मण्डलब्राह्मणम् ॥

ॐ३ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।

पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ यदेतन्मण्डलं तपति तन्महदुक्थं ता ऋचस्स चाँल्लोकोऽथ यदेतदर्चिर्दीप्यते तन्महाव्रतं तानि सामानि स साम्नाँ ल्लोकोऽथ य एष एतस्मिन् मण्डले पुरुषस्सोऽग्नि स्तानि यजूꣳषि स यजुषाँल्लोकस्सैषा त्रय्येव विद्या तपति तद्धैतदप्यविद्वाꣳस आहुस्त्रयी वा एषा विद्या तपतीति वाग्घैव तत्पश्यन्ती वदति ॥१॥

स एष एव मृत्युर्य एष एतस्मिन्मण्डले पुरुषोऽथैत दमृतँ्व्यदेतदर्चिर्दीप्यते तस्मान्मृत्युर्न म्रियतेऽमृते ह्यन्तस्तस्माद् न दृश्यतेऽमृते ह्यन्तः ॥२॥

तदेष श्लोको भवत्यन्तरमृत्योरमृतमित्यवर०ह्ये तन्मृत्योरमृतं मृत्यावमृत माहितमित्येतस्मिन्हि पुरुष एतन्मण्डलं प्रतिष्ठितं तपति मृत्युर्विवस्वन्तँव्वस्त इत्यसौ वा आदित्यो विवस्वानेष ह्यहोरात्रे विवस्ते तमेष वस्ते सर्वतो ह्यनेन परिवृतो मृत्योरात्मा विवस्वतीत्येतस्मिन्हि मण्डल एतस्य पुरुषस्यात्मै तदेष श्लोको भवति ॥३॥

तयोर्वा एतयोरुभयोरेतस्य चार्चिष एतस्य च पुरुषस्यैतन्मण्डलं प्रतिष्ठा तस्मान्महदुक्थं परस्मै न श०सेन्नेदेतां प्रतिष्ठां छिनदा इत्येता०ह स प्रतिष्ठां छिन्त्ते यो महदुक्थं परस्मै श०सति तस्मादुक्थशसं भूयिष्ठं परिचक्षते प्रतिष्ठां च्छिन्नो हि भवतीत्यधिदेवतम् ॥४॥

अथाधियज्ञं यदेतन्मण्डलं तपत्ययं० स रुक्मोऽथ यदेतदर्चिर्दीप्यत इदन्तत्पुष्करपर्णमापो ह्येता आपः

पुष्करपर्णमथ य एष एतस्मिन्मण्डले पुरुषोऽय मेव स योऽयꣳ हिरण्मयः पुरुषस्तदेतदेवैतत्त्रयꣳ सꣳस्कृत्यो होपधत्ते तद्यज्ञस्यैवानु सꣳस्थामूर्ध्वमुत्क्रामति तदेत मप्येति य एष तपति तस्मादग्निं नाद्रियेत परिहन्तुममुत्र ह्येष तदा भवतीत्यु एवाधियज्ञम् ॥५॥

अथाध्यात्मं यदेतन्मण्डलं तपति यश्चैष रुक्म इदंत च्छुक्ल मक्षन्नथ यदेतदर्चिर्दीप्यते यच्चैतत्पुष्कर पर्णमिदं तत्कृष्णमक्षन्नथ य एष एतस्मिन्मण्डले पुरुषो यश्चैष हिरण्मयः पुरुषोऽयमेव स योऽयं दक्षिणेऽक्षन्पुरुषः ॥६॥

स एष एव लोकम्पृणा तामेष सर्वोऽग्निरभि संपद्यते तस्यैतन्मिथुनं योऽयꣳ सव्योऽक्षन्पुरुषोऽर्ध मुहैतदात्मनो यन्मिथुनंय्यदा वै सह मिथुनेनाथ सर्वोऽथ कृत्स्नः कृत्स्नतायै तद्यत्ते द्वे भवतो द्वन्द्वꣳ हि मिथुनं

प्रजननं तस्माद्द्वे द्वे लोकम्पृणे उपधीयेते तस्मादु द्वाभ्यां द्वाभ्यां चितिं प्रणयन्ति ॥७॥

स एष एवेन्द्रो योऽयं दक्षिणेऽक्षन्पुरुषोऽथेयमिन्द्राणी ताभ्यान्देवा एतां व्विधृतिं मकुर्वन्नासिकां तस्माज्जायाया अन्ते नाश्नीयाद्वीर्यवान् हास्माज्जायते वीर्यवन्तमुह सा जनयतियस्या अन्ते नाश्नाति ॥८॥

तदेतद्देवव्रतꣳ राजन्यबन्धवो मनुष्याणामनुतमाङ्गो पायन्ति तस्मादु तेषु वीर्यवाञ्जायतेऽमृतवाका वयसाꣳ साक्षिप्रश्येनं जनयति तौ हृदयस्या काशं प्रत्यवेत्य मिथुनी भवतस्तौ यदा मिथुनस्यान्तं गच्छतोऽथ हैतत्पुरुषः स्वपिति तद्यथा हैवेदं मानुषस्यमिथुनस्यान्तं गत्वाऽसंविद इव भवत्येवꣳ हैवैतदसँव्विद इव भवति दैवꣳह्येतन्मिथुनं परमो ह्येष आनन्दस्तस्मादेवँ व्वित्स्वप्याल्लोक्यꣳ हैते एव तद्देवते

मिथुनेन प्रियेण धाम्ना समर्धयति तस्मादु ह स्वपन्तं धुरेव न बोधयेन्नेदेते देवते मिथुनीभवन्त्यौ हिनसानीती तस्मादुहैतत्सुषुपुषः श्लेष्मणमिव मुखं भवत्येते एव तद्देवते रेतस्सिञ्चतस्तस्माद्रेतस इदꣳ सर्वꣳ संभवति यदिदं किं च ॥९॥

स एष एव मृत्युर्य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन् पुरुषस्तस्य हैतस्य हृदये पादावतिहितौ तौ हैत दाच्छिद्योत्क्रामति स यदोत्क्रामत्यथ हैतत्पुरुषो म्रियते तस्मादु हैतत्प्रेतमाहुराच्छेद्यस्येत्येष उ एव प्राण एष हीमास्सर्वाः प्रजाः प्रणयति तस्यैते प्राणास्स्वास्स यदा स्वपित्यथैनमेते प्राणास्स्वा अपियन्ति तस्मात्स्वाप्ययस्स्वाप्ययो ह वैतꣳ स्वप्न इत्याचक्षते परोक्षं परोक्षकामा हि देवाः ॥१०॥

स एतैस्सुप्तो न कस्यचन वेद न मनसा संकल्पयति

न वाचान्नस्य रसं विजानाति न प्राणेन गन्धं विजानाति न चक्षुषा पश्यति न श्रोत्रेण शृणोत्येतꣳह्येते तदाऽपीता भवन्ति स एष एकस्सन्प्रजासु बहुधा व्याविष्ट स्तस्मादेका सतो लोकं सर्वमग्नि मनुविभव त्यथ यदेक एव तस्मादेका ॥११॥

त आहुरेको मृत्युर्बहवा३ इत्येकश्च बहवश्चेति ह ब्रूयाद्यदाहसावमुत्र तेनैकोऽथ यदिह प्रजासु बहुधा व्याविष्टस्तेनो बहवः ॥१२॥

तदाहुरन्तिके मृत्युर्दूरा३ इत्यन्तिके च दूरे चेति ह ब्रूयाद्यदहाय मिहाध्यात्मं तेनान्तिकेऽथ यदसावमुत्र तेन दूरे ॥१३॥

तदेष श्लोको भवत्यन्ते भात्यपश्रितो रसानाꣳ सङ्क्षरेऽमृत इति यदेतन्मण्डलं तपति तदन्नमथ य एष एतस्मिन्मण्डले पुरुषस्सोत्ता स एतस्मिन्नन्नेऽपरिश्रित

भातीत्यधिदेवतम् ॥१४॥

अथाध्यात्ममिदमेव शरीरमन्नमथ योऽयं दक्षिणेऽक्षन्पुरुषःसोऽत्ता स एतस्मिन्नन्नेऽपरिश्रितो भाति ॥१५॥

तमेतमग्निरित्यध्वर्यव उपासते यजुरित्येष हीद॑ सर्वं युनक्ति सामेति च्छन्दोगा एतस्मिन्हीद॑ सर्व॑ समानमुक्थमिति बह्वृचाएष हीद॑ सर्वमुत्थापयति यातुरिति यातुविद एतेन हीद॑ सर्वँय्यतँव्विष मिति सर्पास्सर्प इति सर्पविद ऊर्गिति देवा रयिरिति मनुष्या मायेत्यसुरास्स्वधेति पितरो देवजन इति देवजनविदो रूपमिति गन्धर्वा गन्ध इत्यप्सरसस्तँय्यथायथोपासते तदेव भवति तद्धैनान्भूत्वाऽवति तस्मादेनमेवँव्वित्सर्वैरेवैतैरुपासीत सर्व॑ हैतद्भवति सर्व॑ हैनमेतद्भूत्वाऽवति ॥१६॥

स एष त्रीष्टकोऽग्निरृगेकायजुरेका सामैका तद्यां

कां चात्रर्चोप दधाति रुक्म एव तस्या आयतनमथ याँय्यजुषा पुरुष एव तस्या आयतनमथ या७ साम्नापुष्करपर्णमेव तस्यायतनमेवं त्रीष्टकस्ते वा एते उभे एष च रुक्म एतच्च पुष्करपर्णमेतं पुरुषमपीत उभे ह्यृक्सामे यजुरपीत एवम्वेकेष्टकः ॥१७॥

स एष एव मृत्युर्य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन् पुरुषस्स एष एवँव्विद आत्मा भवति स यदैवं विदस्माल्लोकात् प्रैत्यथैत मेवात्मान मभिसंभवति सोऽमृतो भवति मृत्युर्ह्यस्यात्मा भवति ॥१८॥

ॐ३ पूर्णमदः – शान्तिः ॥

इति काण्वशतपथब्राह्मणे अग्निरहस्यकाण्डे(१२)
पञ्चमाध्याये द्वितीयं ब्राह्मणम् ॥

इति मण्डलब्राह्मणम् ॥

## अथ भद्रसूक्तम् ॥

आ नो भद्राः क्क्रतवो यन्तु विश्वतोऽदब्धासो अपरीतास
उद्भिदः । देवा नो यथा सदमिद्वृधे असन्नप्रायुवो
रक्षितारो दिवेदिवे ॥१॥

देवानां भद्रा सुमतिर्ऋजूयतान्देवानाँ रातिरभि नो
निवर्त्तताम् । देवानाँ सख्यमुप सेदिमा वयन्देवा न आयुः
प्र तिरन्तु जीवसे ॥२॥

तान्पूर्वया निविदा हूमहे वयं भगं मित्रमदितिन्दक्षमस्रिधम् ।
अर्यमणँ व्वरुणँ सोममश्विना सरस्वती नः सुभगा
मयस्करत् ॥३॥

तन्नो वातो मयोभु वातु भेषजन्तन्माता पृथिवी तत्पिता द्यौः ।
तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतन्धिष्ण्या युवम् ॥४॥

तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसे हूमहे वयम् ।

पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥५॥

स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः प्पूषा विश्ववेदाः ।

स्वस्ति नस्ताक्ष्र्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥६॥

पृषदश्वा मरुतः पृश्निमातरः शुभँय्यावानो विदथेषु जग्मयः ।

अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसागमन्निह ॥७॥

भद्रङ्कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।

स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेम देवहितँ य्यदायुः ॥८॥

शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसन्तनूनाम् ।

पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ॥९॥

अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।

विश्वे देवा अदितिः प्पञ्च जना अदितिर्जातमदितिर्जनित्वम् ॥१०॥

इतिभद्रसूक्तम् ॥

## अथ शिवसङ्कल्पमन्त्राः ॥

ॐ यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति ।
दूरङ्गमञ्ज्योतिषां ज्योतिरेकं तन्मे मनः
शिवसङ्कल्पमस्तु ॥१॥

येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः।
यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु ॥२॥

यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु ।
यस्मान्न ऋते किञ्च न कर्म क्रियते तन्मे मनः
शिवसङ्कल्पमस्तु ॥३॥

येनेदं भूतं भुवनं भविष्यत्परिगृहीतममृतेन सर्वम् ।
येन यज्ञस्तायते सप्त होता तन्मे मनः शिवसङ्कल्पमस्तु ॥४॥

यस्मिन्नृचः साम यजूꣳषि यस्मिन्प्रतिष्ठिता
रथनाभाविवाराः ।

यस्मिँश्चित्तँ सर्वमोतं प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु ॥५॥

सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिन इव ।

हृत्प्रतिष्ठं यदजिरं यविष्ठं तन्मे मनः शिवसङ्कल्पमस्तु ॥६॥

इति शिवसङ्कल्पमन्त्राः ॥

महान्यासे श्रीरुद्रध्यानश्लोकाः ॥

१. सम्वर्त्ताग्निस्फटित्प्रदीप्तकनकप्रस्पर्द्धितेजोरुणम्

गम्भीरध्वनिसामवेदजनकं ताम्राधरं सुन्दरम् ।

अर्धेन्दुद्युतिलोलपिङ्गलजटाभारप्रबद्धोदकं

वन्दे सिद्धसुरासुरेन्द्रनमितं पूर्वमुखं शूलिनः ॥

२. कालाभ्रभ्रमराञ्जनद्युतिनिभं व्यावृत्तपिङ्गेक्षणम्

कर्णोद्भासितभोगिमस्तकमणि प्रोद्भिन्नदंष्ट्राङ्कुरम् ।

सर्पप्रोतकपालशुक्तिशकलव्याकीर्णताशेखरम्

वन्दे दक्षिणमीश्वरस्य वदनं चाथर्वनादोदयम् ॥

३. प्रालेयाचलमिन्दुकुन्दधवलं गोक्षीरफेनप्रभं

भस्माभ्यङ्गमनङ्गदेहदहनज्वालावलीलोचनम् ।

विष्णुब्रह्ममरुद्गणार्चितपदं चऋग्वेदनादोदयम्
वन्देहं सकलं कलङ्करहितं स्थाणोर्मुखं पश्चिमम् ॥

४. गौरं कुङ्कुमपङ्किलं सुतिलकं व्यापाण्डुगण्डस्थलं
भ्रूविक्षेपकटाक्षवीक्षणलसत्संसक्तकर्णोत्पलम् ।
स्निग्धं बिम्बफलाधरं प्रहसितं नीलालकालङ्कृतम्
वन्दे याजुषवेदघोषजनकं वक्त्रं हरस्योत्तरम् ॥

५. व्यक्ताव्यक्तनिरूपितञ्च परमं षट्त्रिंशत्तत्त्वाधिकं
तस्मादुत्तरतत्त्वमक्षरमिति ध्येयं सदा योगिभिः ।
ओंकारादिसमस्तमन्त्रजनकं सूक्ष्मातिसूक्ष्मं परं
वन्दे पञ्चममीश्वरस्य वदनं खव्यापि तेजोमयम् ॥

६. आपातालनभस्तलान्तभुवनब्रह्माण्डमाविस्फुरत्
ज्योतिस्फाटिकलिङ्गमौळिविलसत् पूर्णेन्दु वान्तामृतैः ।
अस्तोकाप्लुतमेकमीशमनिशं रुद्रानुवाकाञ्जपन्
ध्यायेदीप्सितसिद्धये ध्रुवपदं विप्रोऽभिषिञ्चेच्छिवम् ॥

७. पीठं यस्य धरित्री जलधरकलशं लिङ्गमाकाशमूर्तिं
नक्षत्रं पुष्पमाल्यं ग्रहगणकुसुमं चन्द्रवह्न्यर्कनेत्रम् ।
कुक्षिः सप्तसमुद्रं हिमगिरिशिखरं सप्त पातालपादं
वेदं वक्त्रं षडङ्गं दशदिशिवसनं दिव्यलिङ्गं नमामि ॥

८. ब्रह्माण्डव्याप्तदेहा भसितहिमरुचा भासमानाभुजङ्गैः
कण्ठेकालाः कपर्दाः कलितशशिकलाश्चण्डकोदण्डहस्ताः ।
त्र्यक्षा रुद्राक्षमालाः प्रकटितविभवाः शाम्भवमूर्तिभेदाः
रुद्राः श्रीरुद्रसूक्तप्रकटितविभवाः नः प्रयच्छन्तु सौख्यम् ॥

इति महान्यासे श्रीरुद्रध्यानश्लोकाः

## अथ ओषधिसूक्तम् ॥

या ओषधीः प्पूर्वा जाता देवेभ्यस्त्रियुगं पुरा ।
मनै नु बभ्रूणामह९ँ शतन्धामानि सप्त च ॥१॥
शतं व्वो अम्ब धामानि सहस्रमुत वो रुहः ।
अधा शतक्रत्वो यूयमिमं मे अगदङ्कृत ॥२॥
ओषधीः प्प्रति गृभ्णीत पुष्पवतीः प्प्रसूवरीः ।
अश्वाइव सजित्वरीर्वीरुधः प्पारयिष्ण्वः ॥३॥
ओषधीरिति मातरस्तद्वो देवीरुप ब्रुवे ।

सनेयमश्वङ्गाँ व्वासं आत्मानन्त्वव पूरुष ॥४॥

अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता ।

गोभाज इत्किलासथ यत्सनवथ पूरुषम् ॥५॥

यत्रौषधीः समग्मत राजानः समिताइव ।

विप्रः स उच्यते भिषग्रक्षोहाऽमीवचातनः ॥६॥

अश्वावती॑ सोमावतीमूर्जयन्तीमुदोजसम् ।

आवित्सि सर्वा ओषधीरस्मा अरिष्टतातये ॥७॥

उच्छुष्मा ओषधीनाङ्गावो गोष्ठादिवेरते ।

धन॑ सनिष्यन्तीनामात्मानन्त्वव पूरुष ॥८॥

इष्कृतिर्नाम वो मातायो यूय॑ स्थ निष्कृतीः ।

सिराः प्पतत्रिणी स्थन यदामयति निष्कृथ ॥९॥

अति विश्वाः प्परिष्ठा स्तेनइव व्रजमक्रमुः ।

ओषधीः प्प्राचुच्यवुर्यत्किञ्च तन्वो रपः ॥१०॥

यदिमा वाजयन्नहमोषधीर्हस्त आ दधे ।
आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा ॥११॥
यस्यौषधीः प्रसर्पथाङ्गमङ्गं परुष्परुः ।
ततो यक्ष्मँ व्विबाधध्व उग्रो मध्यमशीरिव ॥१२॥
साकँ य्यक्ष्म प्रपत चाषेण किकिदीविना ।
साकँ व्वातस्य ध्राज्या साकन्नश्य निहाकया ॥१३॥
अन्या वो अन्यामवत्वन्यान्यस्या उपावता ।
ताः सर्वाः सँव्विदाना इदं मे प्रावता वचः ॥१४॥
याः फ्फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः ।
बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वꣳहसः ॥१५॥
मुञ्चन्तु मा शपथ्यादथो वरुण्यादुत ।
अथो यमस्य पड्वीशात् सर्वस्माद्देवकिल्बिशात् ॥१६॥
अवपतन्तीः समवदन्त दिव ओषधयस्परि ।

यञ्जीवमश्नवामहै न स रिष्याति पूरुषः ॥१७॥
या ओषधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः ।
तासामसि त्वमुत्तमारङ्कामाय शꣳ हृदे ॥१८॥
या ओषधीः सोमराज्ञीर्विष्ठिताः पृथिवीमनु ।
बृहस्पतिप्रसूता अस्यै सन्दत्त वीर्यम् ॥१९॥
याश्चेदमुपशृण्वन्ति याश्च दूरं परागताः ।
सर्वाः सङ्गत्य वीरुधोऽस्यै सन्दत्त वीर्यम् ॥२०॥
नाशयित्री बलासस्यार्शस उपचितामसि ।
अथो शतस्य यक्ष्माणां पाकारोरसि नाशनी ॥२१॥
मा वो रिषत्खनिता यस्मै चाहङ्खनामि वः ।
द्विपच्चतुष्पदस्माकꣳ सर्वमस्त्वनातुरम् ॥२२॥
ओषधयः सँ वदन्ते सोमेन सह राज्ञा ।
यस्मै कृणोति ब्राह्मणस्तꣳ राजन्पारयामसि ॥२३॥

त्वां गन्धर्वा अखनँस्त्वामिन्द्रस्त्वां बृहस्पतिः ।
त्वामोषधे सोमो राजा विद्वान्यक्ष्मादमुच्यत ॥२४॥
त्वमुत्तमास्योषधे तव वृक्षा उपस्तयः ।
उपस्तिरस्तु सोऽस्माकँ य्यो अस्माँ अभिदासति ॥२५॥

इति ओषधिसूक्तम् ॥

## अथ राष्ट्रभृत्सूक्तम् ॥

अपो देवा मधुमतीरगृभ्णन्नूर्जस्वती रजस्वश्चितानाः ।
याभिर्मित्रावरुणा अभ्यषिञ्चन् याभिरिन्द्रमनयन्नत्यरातीः ॥१॥
वृष्ण ऊर्मिरसि राष्ट्रदा राष्ट्रं मे देहि स्वाहा वृष्ण ऊर्मिरसि
राष्ट्रदा राष्ट्रममुष्मै देहि । वृषसेनोऽसि राष्ट्रदा राष्ट्रं मे देहि
स्वाहा वृषसेनोऽसि राष्ट्रदा राष्ट्रममुष्मै देहि ॥२॥
अर्थेत स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहार्थेत स्थ राष्ट्रदा

राष्ट्रममुष्मै दत्त । ओजस्वती स्थ राष्ट्रदा राष्ट्रं मे दत्त
स्वाहौजस्वती स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त । आपः प्परिवाहिणी
स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहापः प्परिवाहिणी स्थ राष्ट्रदा
राष्ट्रममुष्मै दत्त । अपां पतिरसि राष्ट्रदा राष्ट्रं मे देहि
स्वाहापां पतिरसि राष्ट्रदा राष्ट्रममुष्मै देहि । अपाङ्गर्भोऽसि
राष्ट्रदा राष्ट्रं मे देहि स्वाहापाङ्गर्भोऽसि राष्ट्रदा राष्ट्रममुष्मै
देहि । सूर्यवर्चस स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा सूर्यवर्चस
स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त । सूर्यत्वच स्थ राष्ट्रदा राष्ट्रं मे
दत्त स्वाहा सूर्यत्वच स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त । व्रजक्षित
स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा व्रजक्षित स्थ राष्ट्रदा
राष्ट्रममुष्मै दत्त । वाशा स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा
वाशा स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त । मान्दा स्थ राष्ट्रदा राष्ट्रं
मे दत्त स्वाहा मान्दा स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त ।

शक्वरी स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा शक्क्वरी स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त। जनभृत स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा जनभृत स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त । विश्वभृत स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा विश्वभृत स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त । शैष्ठा स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा शैष्ठा स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त । आपः स्वाराज़ी स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त ॥३॥

सं मधुमतीर्मधुमतीभिः पृच्यन्तां महि क्षत्रङ्क्षत्रियाय वन्वानाः । अनाधृष्टाः सीदत सहौजसा महि क्षत्रङ्क्षत्रियाय दधतीः ॥४॥

इति राष्ट्रभृत्सूक्तम् ॥

## अथ नवग्रहसूक्तम् ॥

आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥
त्र्यंबकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥
अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ॥

त्र्यंबकाधिदेवतायै अग्निप्रत्यधिदेवतायै आदित्याय नमः ॥१॥

इमन्देवा असपत्नꣳ सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय ।
इममम़ुममुष्य पुत्रममुष्याः पुत्रमस्यै विशे ॥
एषः वः कुरवो राजैष वः पञ्चाला राजा ।
सोमोऽस्माकं ब्राह्मणानाꣳ राजा ॥

श्रीश्च ते लक्ष्मीश्च पत्न्या अहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् । इष्णन्निषाणामुम्म इषाण सर्वलोकं म इषाण ॥

आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन ।
महे रणाय चक्षसे ॥

**श्री अधिदेवतायै अप्प्रत्यधिदेवतायै सोमाय नमः ॥२॥**

अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् ।
अपाꣳ रेताꣳसि जिन्वति ॥

यदक्रन्दः प्रथमं जायमान उद्यन्त्समुद्रादुत वा पुरीषात् ।
श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महि जातन्ते अर्वन् ॥

भूम्या आखूनालभतेऽन्तरिक्षाय पाङ्क्त्रान् दिवे कशान् ।
दिग्भ्यो नकुलान्बभ्रुकानवान्तरदिशाभ्यः ॥

**स्कन्दाधिदेवतायै भूमिप्रत्यधिदेवतायै अङ्गारकाय नमः ॥३॥**

उद्बुध्यस्वाग्ने प्रति जागृहि त्वमिष्टापूर्ते सꣳसृजेथामयञ्च ।
अस्मिन्त्सधस्थे अध्युत्तरस्मिन्विश्वे देवा यजमानश्च सीदत ॥
विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजाꣳसि ।
यो अस्कभायदुत्तरꣳ सधस्थं विचक्रमाणस्त्रेधोरुगायो विष्णवे त्वा ॥
विष्णोरराटमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि
विष्णोर्ध्रुवोऽसि । वैष्णवमसि विष्णवे त्वा ॥

विष्ण्वधिदेवतायै विष्णुप्रत्यधिदेवतायै बुधाय नमः ॥४॥

बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु ।
यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणन्धेहि चित्रम् ॥
आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः ।
शूर इषव्योऽतिव्याधी महारथो जायताम् ॥
इन्द्रः पश्चादिन्द्रः पुरस्तादिन्द्रो अस्माँ अभि पातु विश्वतः ।

इन्द्रो जिघाꣳसता मनाꣳसि विषूचीना व्यस्यतात् ॥

ब्रह्माधिदेवतायै इन्द्रप्रत्यधिदेवतायै बृहस्पतये नमः ॥५॥

अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिबत्क्षत्रं पयः सोमं प्रजापतिः ।
ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धस
इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु॥
सजोषा इन्द्र सगणो मरुद्भिः सोमं पिब वृत्रहा शूर विद्वान् ।
जहि शत्रूꣳरप मृधो नुदस्वाथाभयं कृणुहि विश्वतो नः ॥
इन्द्रन्नुरः कवष्यो धावमाना वृषाणं य्यन्तु जनयः सुपत्नीः ।
द्वारो देवीरभितो विश्रयन्ताꣳ सुवीरा वीरं प्रथमाना महोभिः ॥

इन्द्राधिदेवतायै इन्द्राणी प्रत्यधिदेवतायै भगवते शुक्राय नमः ॥६॥

शन्नो देवीरभिष्टय आपो भवन्तु पीतये ।
शं य्योरभि स्रवन्तु नः॥

यमाय त्वा मखाय त्वा सूर्यस्य त्वा तपसे ।
देवस्त्वा सविता मध्वानक्तु पृथिव्याः स९स्पृशस्पाहि ।
अर्चिरसि शोचिरसि तपोऽसि ॥
प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव ।
यत्कामास्ते जुहुमस्तन्नो अस्तु वय९ स्याम पतयो रयीणाम् ॥
यमाधिदेवतायै प्रजापति प्रत्यधिदेवतायै शनैश्चराय नमः ॥७॥

कण्डात्काण्डात् प्ररोहन्ती परुषःपरुषस्परि ।
एवा नो दूर्वे प्रतनु सहस्रेण शतेन च ॥
कार्षिरसि समुद्रस्य त्वाक्षित्या उन्नयामि ।
समापो अद्भिरग्मत समोषधीभिरोषधीः ॥
नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु ।
ये अन्तरिक्षे ये दिवि तेभ्यस्सर्पेभ्यो नमः ॥
कालाधिदेवतायै सर्पप्रत्यधिदेवतायै राहवे नमः ॥८॥

केतुङ्कृण्वन्नकेतवे पेशो मर्या अपेशसे ।

समुषद्भिरजायथाः ॥

चित्रावसो स्वस्ति ते पारमशीय ।

सन्त्वमग्ने सूर्यस्य वर्चसागथाः समृषीणाँ स्तुतेन ॥

ब्रह्म जज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन आवः ।

स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥

चित्रगुप्ताधिदेवतायै ब्रह्मपत्यधिदेवतायै केतवे नमः ॥९॥

इतिनवग्रहसूक्तम् ॥

## अथ दिक्पालकमन्त्राः ॥

गणानान्त्वा गणपतिँ हवामहे प्रियाणान्त्वा प्रियपतिँ

हवामहे । निधीनान्त्वा निधिपतिँ हवामहे वसो मम ॥

महागणपतये नमः॥

श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् । इष्णन्निषाणामुम्म इषाण सर्वलोकं म इषाण ॥

**श्रियै नमः ॥**

इन्द्रः पश्चादिन्द्रः पुरस्तादिन्द्रो अस्माँ अभि पातु विश्वतः । इन्द्रो जिघाꣳसतां मनाꣳसि विषूचीना व्यस्यतात् ॥ **इन्द्राय नमः ॥**

त्वन्नो अग्ने तव देव पायुभिर्मघोनो रक्ष तन्वश्च वन्द्य । त्राता तोकस्य तनये गवामस्यनिमेषꣳ रक्षमाणस्तव व्रते।

**अग्नयेनमः ॥**

सुगन्नु पन्थां प्रदिशन्न एहि ज्योतिष्मद्ध्येह्यजरन्न आयुः । अपैतु मृत्युरमृतन्न आगाद्वैवस्वतो नो अभयं कृणोतु ॥

**यमाय नमः॥**

असुन्वन्तमयजमानमिच्छ स्तेनस्येत्यामन्विहि तस्करस्य ।

अन्यमस्मदिच्छ सा त इत्या नमो देवि निरृते तुभ्यमस्तु ॥

**निरृतये नमः ॥**

तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः ।
अहेळमानो वरुणेह बोध्युरुश॰समा न आयुः प्रमोषीः ॥

**वरुणाय नमः ॥**

आ नो नियुद्भिः शतिनीभिरध्वर॰ सहस्रिणीभिरुप याहि
यज्ञम् । वायो अस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभिः सदा
नः ॥ **वायवे नमः ॥**

वय॰ सोम व्रते तव मनस्तनूषु बिभ्रतः । प्रजावन्तः
सचेमहि ॥ **सोमाय नमः ॥**

तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसे हूमहे
वयम् । पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः
स्वस्तये ॥ **ईशानाय नमः ॥**

अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः ।

यः शꣳसते स्तुवते धायि पज्र इन्द्रज्येष्ठा अस्माँ अवन्तु देवाः ॥

रुद्राय नमः ॥

स्योना पृथिवि नो भवानृक्षरा निवेशनी ।

यच्छा नः शर्म सप्रथाः ॥ पृथिव्यै नमः ॥

विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात् ।

संबाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन्देव एकः ॥

विश्वेभ्यो देवेभ्यो नमः ॥

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ।

समूढमस्य पाꣳसुरे स्वाहा ॥ महाविष्णवे नमः ॥

इति दिक्पालकमन्त्राः ॥

## अथ आदित्यहृदयम् ॥

ध्यानम्–

नमः सवित्रे जगदेकचक्षुषे
जगत्प्रसूति स्थितिनाशहेतवे ।
त्रयीमयाय त्रिगुणात्मधारिणे
विरिञ्चिनारायणशङ्करात्मने ॥

ततो युद्धपरिश्रान्तं समरे चिन्तया स्थितम् ।
रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थितम् ॥१॥
दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम् ।
उपागम्याब्रवीद्राममगस्त्यो भगवान् ऋषिः ॥२॥
राम राम महाबाहो शृणु गुह्यं सनातनम् ।
येन सर्वानरीन् वत्स समरे विजयिष्यसि ॥३॥
आदित्यहृदयं पुण्यं सर्वशत्रुविनाशनम् ।
जयावहं जपेन्नित्यमक्षय्यं परमं शिवम् ॥४॥
सर्वमंगळमाङ्गल्यं सर्वपापप्रणाशनम् ।
चिन्ताशोकप्रशमनं आयुर्वर्धनमुत्तमम् ॥५॥

रश्मिमन्तं समुद्यन्तं देवासुरनमस्कृतम् ।
पूजयस्व विवस्वन्तं भास्करं भुवनेश्वरम् ॥६॥
सर्वदेवात्मको ह्येष तेजस्वी रश्मिभावनः ।
एष देवासुरगणान् लोकान् पाति गभस्तिभिः ॥७॥
एष ब्रह्मा च विष्णुश्च शिव स्कन्दः प्रजापतिः ।
महेन्द्रो धनदः कालो यमः सोमो ह्यपांपतिः ॥८॥
पितरो वसवः साध्या ह्यश्विनौ मरुतो मनुः ।
वायुर्वह्निः प्रजाप्राणः ऋतुकर्ता प्रभाकरः ॥९॥
आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान् ।
सुवर्णसदृशो भानुः हिरण्यरेता दिवाकरः ॥१०॥
हरिदश्वः सहस्रार्चिः सप्तसप्तिर्मरीचिमान् ।
तिमिरोन्मथनः शम्भुस्त्वष्टा मार्ताण्डकोंऽशुमान् ॥११॥
हिरण्यगर्भः शिशिरस्तपनो भास्करो रविः ।
अग्निगर्भोऽदितेः पुत्रः शङ्खः शिशिरनाशनः ॥१२॥
व्योमनाथस्तमोभेदी ऋग्यजुःसामपारगः ।
घनवृष्टिरपांमित्रो विन्ध्यवीथीप्लवङ्गमः ॥१३॥
आतपी मण्डली मृत्युः पिङ्गळः सर्वतापनः ।

कविर्विश्वो महातेजाः रक्तः सर्वभवोद्भवः ॥१४॥

नक्षत्रग्रहताराणां अधिपो विश्वभावनः ।

तेजसामपि जेजस्वी द्वादशात्मन्नमोऽस्तु ते ॥१५॥

नमः पूर्वाय गिरये पश्चिमायाद्रये नमः ।

ज्योतिर्गणानां पतये दिनाधिपतये नमः ॥१६॥

जयाय जयभद्राय हर्यश्वाय नमो नमः ।

नमो नमः सहस्रांशो आदित्याय नमो नमः ॥१७॥

नम उग्राय वीराय सारङ्गाय नमो नमः ।

नमः पद्मप्रबोधाय मार्ताण्डाय नमो नमः ॥१८॥

ब्रह्मेशानाच्युतेशाय सूर्यायादित्यवर्चसे ।

भास्वते सर्वभक्षाय रौद्राय वपुषे नमः ॥१९॥

तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने ।

कृतघ्नघ्नाय देवाय ज्योतिषां पतये नमः ॥२०॥

तप्तचामीकराभाय वह्नये विश्वकर्मणे ।

नमस्तमोऽभिनिघ्नाय रुचये लोकसाक्षिणे ॥२१॥

नाशयत्येष वै भूतं तदेव सृजति प्रभुः ।

पायत्येष तपत्येष वर्षत्येष गभस्तिभिः ॥२२॥

एष सुप्तेषु जागर्ति भूतेषु परिनिष्ठितः ।
एष चैवाग्निहोत्रं च फलं चैवाग्निहोत्रिणाम् ॥२३॥
वेदाश्च क्रतवश्चैव क्रतूनां फलमेव च ।
यानि कृत्यानि लोकेषु सर्व एष रविः प्रभुः ॥२४॥

फलश्रुतिः –

एनमापत्सु कृच्छ्रेषु कान्तारेषु भयेषु च ।
कीर्तयन् पुरुषः कश्चिन्नावसीदति राघव ॥२५॥
पूजयस्वैनमेकाग्रो देवदेवं जगत्पतिम् ।
एतत्त्रिगुणितं जप्त्वा युद्धेषु विजयिष्यसि ॥२६॥
अस्मिन् क्षणे महाबाहो रावणं त्वं वधिष्यसि ।
एवमुक्त्वा तदागस्त्यो जगाम च यथागतम् ॥२७॥
एतच्छ्रुत्वा महातेजाः नष्टशोकोऽभवत्तदा ।
धारयामास सुप्रीतो राघवः प्रयतात्मवान् ॥२८॥
आदित्यं प्रेक्ष्य जप्त्वा तु परं हर्षमवाप्तवान् ।
त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्यवान् ॥२९॥
रावणं प्रेक्ष्य हृष्टात्मा युद्धाय समुपागमत् ।
सर्वयत्नेन महता वधे तस्य धृतोऽभवत् ॥३०॥

अथ रविरवदन्निरीक्ष्य रामं मुदितमनाः परमं प्रहृष्यमाणः ।
निशिचरपतिसंक्षयं विदित्वा सुरगणमध्यगतो वचस्त्वरेति ॥३१॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे
पञ्चाधिकशततमसर्गः ॥

## अथ आर्या द्वादशकम् ॥

उद्यन्नद्य विवस्वानारोहन्नुत्तरन्दिवन्देवः ।
हृद्रोगं मम सूर्यो हरिमाणं चाशु नाशय ॥ ह्रां मित्राय नमः ॥१॥

निमिषार्धेनैकेन द्वे च शते द्वे तथा सहस्रे च ।
क्रममाण योजनानां नमोऽस्तु ते नळिननाथाय ॥ ह्रीं रवये नमः ॥२॥

शिवरूपात् ज्ञानमहं त्वत्तो मुक्तिं जनार्दनाकारात् ।
शिखिरूपाच्चैश्वर्यं भवतश्चारोग्यमिच्छामि ॥ ह्रूं सूर्याय नमः ॥३॥

कर्मज्ञानखदशकं मनश्च जीव इति विश्वसर्गाय ।
द्वादशधा यो विचरति स द्वादशमूर्तिस्तु मुदे ॥ ह्रैं भानवे नमः ॥४॥

त्वं यजुरृक्साम त्वमागमस्त्वं वषट्कारः ।
त्वं विश्वस्त्वं हंसस्त्वं भानुः परमहंसश्च ॥ ह्रौं खगाय नमः ॥५॥

त्वचि दोषा दृशि दोषा हृदि दोषा येऽखिलेन्द्रियदोषाः ।

तान्पूषा हतदोषानीषद्रोषाग्निना दहतु ॥ ह्रः पूष्णे नमः ॥६॥

तिमिरमिव नेत्रतिमिरं पटलमिवाऽशेषरोगपटलं च ।

काचमिव धीनिकोचं कालपिता मम निराकुर्यात् ॥

ह्रां हिरण्यगर्भाय नमः ॥७॥

धर्मार्थकाममोक्षप्रतिरोधिन उग्रवेगतापकरान् ।

मन्दीकृतेन्द्रियगणानगदान्विनाशयतु चण्डांशुः॥ ह्रीं मरीचये नमः ॥८॥

येन विनान्धन्तिमिरं जगदेतद्यत्र सति धृतबोधं ।

तन्त्रब्जिनीभर्तारं हर्तारं चापदामीडे ॥ ह्रूं आदित्याय नमः ॥९॥

यस्य सहस्राभीशोरभीशुलेशो हिमांशुबिंबगतः ।

भासयति नक्तमखिलं खिलयतु स विपद्गणानखिलान् ॥

ह्रैं सवित्रे नमः ॥१०॥

वाताश्मरि दुर्नामत्वग्दोषमहोदरप्रमेहांश्च ।

ग्रहिणीभगन्दरमुखान्महारुजोऽपि त्वमिन हरसि ॥

ह्रौं अर्काय नमः ॥११॥

त्वं शरणं त्वं माता त्वं च पिता त्वं धनं त्वमाचार्यः ।

त्वं त्राता त्वं हर्ता विपदामर्क प्रसीद मम ॥

ह्रः भास्कराय नमः ॥१२॥

इत्यार्याद्वादशकं सांबस्य पुरो नभस्तलात्पतितम् ।
पठतां भाग्यसमृद्धिस्सर्वगरोगक्षयश्च स्यात् ॥१३॥
छायादेवीसंज्ञादेवीसमेतश्री सूर्यनारायणस्वामिने नमः।
ॐ नमो नारायणाय ।
मित्र रविसूर्यभानु खग पूष हिरण्यगर्भमरीच्यादित्य
सवित्रर्क भास्करेभ्यो नमो नमः ॥

इतिआर्या द्वादशकम् ॥

श्री याज्ञवल्क्योपदिष्टं सूर्यकवचम् ॥

याज्ञवल्क्य उवाच –

शृणुष्व मुनिशार्दूल सूर्यस्य कवचं शुभम् ।
शरीरारोग्यदं दिव्यं सर्वसौभाग्यदायकम् ॥१॥
देदीप्यमानमकुटं स्फुरन्मकरकुण्डलम् ।
ध्यत्वा सहस्रकिरणं स्तोत्रमेतदुदीरयेत् ॥२॥
शिरो मे भास्करः पातु ललाटं मेऽमितद्युतिः ।
नेत्रे दिनमणिः पातु श्रवणँव्वासरेश्वरः ॥३॥
घ्राणं घर्ममणिः पातु वदनँवेदवाहनः ।
जिह्वां मे मानदः पातु कण्ठं मे सुरवन्दितः ॥४॥

स्कन्धौ प्रभाकरः पातु वक्षः पातु जनप्रियः ।
पातु पादौ द्वादशात्मा सर्वाङ्गं सकलेश्वरः ॥५॥
सूर्यरक्षात्मकं स्तोत्रं लिखित्वा भूर्जपत्रके ।
दधाति यः करे तस्य वशगास्सर्वसिद्धयः ॥६॥
सुस्नातो यो जपेत्सम्यग्योऽधीते स्वस्थमानसः ।
स रोगमुक्तो दीर्घायुस्सुखं पुष्टिं च विन्दति ॥७॥

इति श्री याज्ञवल्क्योपदिष्टं सूर्यकवचम् ॥

## अथ श्रीसूक्तम् ॥

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥१॥
तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यंविन्देयं गामश्वं पुरुषानहम् ॥२॥
अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम् ।
श्रियन्देवीमुपह्वये श्रीर्मा देवी जुषताम् ॥३॥
कांसोस्मितां हिरण्यप्रकारामार्द्रां ज्वलन्तीं तृप्तान्तर्पयन्तीम् ।
पद्मे स्थितां पद्मवर्णान्तामिहोपह्वये श्रियम् ॥४॥
चन्द्रां प्रभासांय्यशसा ज्वलन्तीं श्रियं ल्लोके देवजुष्टामुदाराम् ।
तां पद्मिनीमीं शरणमहं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे ॥५॥
आदित्यवर्णे तपसोऽधि जातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।
तस्य फलानि तपसा नुदन्तु मायान्तरायाश्च बाह्या अलक्ष्मीः ॥६॥
उपैतु मान्देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन्कीर्तिमृद्धिं ददातु मे ॥७॥
क्षुत्पिपासामलाञ्ज्येष्ठामलक्ष्मीन्नाशयाम्यहम् ।
अभूतिमसमृद्धिं च सर्वान्निर्णुद मे गृहात् ॥८॥
गन्धद्वारान्दुराधर्षं नित्यपुष्टाङ्करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥९॥
मनसः काममाकूतिं व्वाचः सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीश्श्रयतां य्यशः ॥१०॥
कर्दमेन प्रजा भूता मयि संभव कर्दम ।
श्रियंव्वासय मे कुले मातरं पद्ममालिनीम् ॥११॥

आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे ।
नि च देवीं मातरं श्रियँ व्वासय मे कुले ॥१२॥
आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्मयीँ ल्लक्ष्मीं जातवेदो म आवह ॥१३॥
आर्द्रां यः करिणीँ य्यष्टिं पिङ्गलां पद्ममालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥१४॥
तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान् विन्देयं पुरुषानहम् ॥१५॥

**श्रीसूक्तफलश्रुतिः ।**

यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।
श्रियः पञ्चदशर्चं च श्रीकामस्सततं जपेत् ॥
पद्मासने पद्मऊरू पद्माक्षी पद्मसंभवे ।
त्वं मां भजस्व पद्माक्षि येन सौख्यँल्लभाम्यहम् ॥
अश्वदायी गोदायी धनदायी महाधने ।
धनं मे जुषतां देवि सर्वकामार्थसिद्धये ॥
पुत्रपौत्रधनं धान्यं हस्त्यश्वादि गवे रथम् ।
प्रजानां भवसि माता आयुष्मन्तं करोतु माम् ॥
चन्द्रभां लक्ष्मीमीशानां सूर्याभां श्रियमैश्वरीम् ।
चन्द्रसूर्याग्निवर्णाभां महालक्ष्मीमुपास्महे ॥
धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः ।
धनमिन्द्रो बृहस्पतिर्वरुणं धनमश्नुते ॥
वैनतेय सोमं पिब सोमं पिबतु वृत्रहा ।
सोमं धनस्य सोमिनो मह्यं ददातु सोमिनी ॥

न क्रोधो न च मात्सर्यं न लोभो नाशुभामतिः ।
भवन्ति कृतपुण्यानां भक्तानां श्रीसूक्तं जपेत्सदा ॥
वर्षन्तु ते विभावरी दिवो अभ्रस्य विद्युतः ।
रोहन्तु सर्वबीजान्युप ब्रह्मद्विषो जहि ॥
पद्मप्रिये पद्मिनि पद्महस्ते पद्मालये पद्मदलायताक्षि ।
विश्वप्रिये विश्वमनोनुकूले त्वत्पादपद्मं मयि सन्निधत्स्व ॥
महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहि ।
तन्नो लक्ष्मीः प्रचोदयात् ॥
या सा पद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी
गंभीरावर्तनाभिः स्तनभरनमिता शुभ्रवस्त्रोत्तरीया ।
लक्ष्मीर्दिव्यैर्गजेन्द्रैर्मणिगणखचितैः स्नापिता हेमकुंभैः
नित्यं सा पद्महस्ता मम वसतु गृहे सर्वमाङ्गल्ययुक्ता ॥
सिद्धलक्ष्मीर्मोक्षलक्ष्मीर्जयलक्ष्मीः सरस्वती ।
श्रीर्लक्ष्मीर्वरलक्ष्मीश्च प्रसन्ना भव सर्वदा ॥
वराङ्कुशौ पाशमभीतिमुद्रां करैर्वहन्तीं कमलासनस्थाम् ।
बालार्ककोटि प्रतिभां त्रिणेत्रां भजेहमाद्यां जगदीश्वरीं ताम् ॥
सर्वमङ्गळमाङ्गल्ये शिवे सर्वार्थसाधके ।
शरण्ये त्र्यंबके देवि नारायणि नमोऽस्तु ते ॥
श्रीर्वर्चस्यमायुष्यमारोग्यमाविधाच्छोभमानं महीयते ।
धान्यं धनं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥
इति श्रीसूक्तफलश्रुतिः ॥

## अथ दुर्गासूक्तम् ॥

ॐ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुन्दुरितात्यग्निः ॥
तामग्निवर्णान्तपसा ज्वलन्तीँव्वैरोचनीं कर्मफलेषु जुष्टाम् ।
दुर्गां देवी९ँ शरणमहं प्रपद्ये सुतरसितरसे नमः ।
अग्ने त्वं पारया नव्यो अस्मान् स्वस्तिभिरतिदुर्गाणि विश्वा ॥
पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शँय्योः ।
विश्वानि नो दुर्गहा जातवेदः सिन्धुन्न नावा दुरितातिपर्षि ॥
अग्ने अत्रिवन्मनसा गृणानोऽस्माकं बोध्यविता तनूनाम् ।
पृतनाजित९ँ सहमानमुग्रमग्नि९ँ हुवेम परमात्सधस्थात् ।
स नः पर्षदति दुर्गाणि विश्वा क्षामद्देवो अति दुरितात्यग्निः ।
प्रत्नोषिकमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि ।
स्वां चाग्ने तनुवं पिप्रयस्वास्मभ्यञ्च सौभगमायजस्व ।
गोभिर्जुष्टमयुजो निषिक्तं तवेन्द्र विष्णोरनुसञ्चरेम ।
नाकस्य पृष्ठमभिसँव्वसानो वैष्णवीँल्लोकमिह मादयन्ताम् ॥

कात्यायनाय विद्महे कन्यकुमारि धीमहि ।
तन्नो दुर्गिः प्रचोदयात् ॥

इतिदुर्गासूक्तम् ॥

## सरस्वतीसूक्तम् ॥

अश्विना तेजसा चक्षुः प्राणेन सरस्वती वीर्यम् ।
वाचेन्द्रो बलेनेन्द्राय दधुरिन्द्रियम् ॥१॥
गोमदूषु णासत्याश्वावद्यातमश्विना ।
वर्ती रुद्रा नृपाय्यम् ॥२॥
न यत्परो नान्तर आदधर्षद्वृषण्वसू ।
दुःशꣳसो मर्त्यो रिपुः ॥३॥
ता न आवोढ्ळमश्विना रयिं पिशङ्गसन्दृशम् ।
धिष्ण्या वरिवोविदम् ॥४॥
पावका नः सरस्वती वाजेभिर्वाजिनीवती ।
यज्ञँ वष्टु धियावसुः ॥५॥
चोदयित्री सूनृतानाञ्चेतन्ती सुमतीनाम् ।
यज्ञन्दधे सरस्वती ॥६॥

महो अर्णः सरस्वती प्र चेतयति केतुना ।

धियो विश्वा विराजति ॥७॥

इन्द्रा याहि चित्रभानो सुता इमे त्वायवः ।

अण्वीभिस्तना पूतासः ॥८॥

इन्द्रा याहि धियेषितो विप्रजूतः सुतावतः ।

उप ब्रह्माणि वाघतः ॥९॥

इन्द्रा याहि तूतुजान उप ब्रह्माणि हरिवः ।

सुते दधिष्व नश्चनः ॥१०॥

अश्विना पिबतां मधु सरस्वत्या सजोषसा ।

इन्द्रः सुत्रामा वृत्रहा जुषन्ता९ सोम्यं मधु ॥११॥

॥ श्री महा सरस्वत्यै नमः ॥

### अशनि निवारणमन्त्रः ।

शिवा नो वर्षास्सन्तु शिवा नस्सन्तु हेतयः ।
शिवा नस्तास्सन्तु यास्त्वꣳ सृजति वृत्रहन् ॥
अर्जुनः फल्गुनः पार्थः किरीटी श्वेतवाहनः ।
बीभत्सुर्विजयः कृष्णस्सव्यसाची धनञ्जयः ॥

**इति अशनिनिवारण मन्त्रः ॥**

### स्वापकाले जप्यमन्त्रः ॥

अपसर्प सर्प भद्रं ते दूरं गच्छ महाविष ।
जनमेजययज्ञान्ते चास्तीकवचनं स्मरन् ॥
जरत्कारोर्जरत्कार्वां समुत्पन्नो महायशाः ।
अस्तीकस्सत्यसन्धो मां पन्नगेभ्योऽभिरक्षतु ॥

**इति स्वापकाले जप्यमन्त्रः ॥**

## अथायुष्यसूक्तम् ॥

आयुष्टे विश्वतो दधदयमग्निर्वरेण्यः ।
पुनस्ते प्राण आयाति परायक्ष्म॑ सुवाति नः ॥
आयुष्मानग्ने हविषा वृधानो घृतप्रतीको घृतयोनिरेधि ।
घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभिरक्षतादिमान् ॥

इति पुरोऽनुवाक्यायाज्ये ॥

यो ब्रह्मा ब्रह्मण उज्जहार प्राणैश्शिरः कृत्तिवासाः पिनाकी ।
ईशानो देवस्स न आयुर्दधातु तस्मै जुहोमि हविषा घृतेन ॥१॥
विभ्राजमानस्सरिरस्य मध्याद्रोचमानो घर्मरुचिर्न आगात् ।
स मृत्युपाशादपनुद्य घोरादिहायुषे नो घृतमत्तु देवः ॥२॥
ब्रह्मज्योतिर्ब्रह्मपत्नीषु गर्भँय्यमादधात्पुरुरूपञ्जयन्तम् ।
सुवर्णरंभग्रहमर्कमर्च्यं तमायुषे वर्धमानो घृतेन ॥३॥
श्रियँल्लक्ष्मीमौबलामंबिकां गां षष्ठीञ्जयामिन्द्रसेनेत्युदाहुः ।
तां विद्यां ब्रह्मयोनि॑ सरूपामिहायुषे तर्पयामो घृतेन ॥४॥
दाक्षायण्यस्सर्वयोन्यस्सयोन्यस्सहस्रशो विश्वरूपा विरूपाः ।

ससूनवस्स्सपतयस्स्ससूथ्या आयुषे नो घृतमिदं जुषन्ताम् ॥५॥

दिव्या गणा बहुरूपाः पुराणा आयुश्छिदो नः प्रमथ्नन्तु वीरान् ।

तेभ्यो जुहोमि बहुधा घृतेन मा नः प्राजाꣳ रीरिषो मोत वीरान्॥६॥

एकः पुरस्ताद्य इदं बभूव यतो बभूव भुवनस्य गोपाः ।

यमप्येति भुवनꣳ सांपराये स नो हविर्घृतमिहायुषेऽत्तु देवः ॥७॥

वसून्रुद्रानादियान्मरुतोऽथ साध्यानृभून्यक्षान्गन्धर्वाꣳश्च पितृꣳश्च

विश्वान् । भृगून्त्सर्पाꣳश्चाङ्गिरसोऽथ सर्वान् घृतꣳ हुत्वा

स्वायुष्यामहयाम शश्वत् ॥८॥

विष्णो त्वं नो अन्तमश्शर्म यच्छ सहन्त्य ।

प्रते धारा मधुश्चुत उत्सं दुह्रते अक्षितम् ॥

इति आयुष्यसूक्तम् ॥

## अथ प्रातःस्मरणम् ॥

ब्रह्मा मुरारिस्त्रिपुरान्तकश्च भानुश्शशी भूमिसुतो बुधश्च ।
गुरुश्च शुक्रः शनिराहुकेतवः कुर्वन्तु सर्वे मम सुप्रभातम् ॥
भृगुर्वसिष्ठः क्रतुरङ्गिराश्च मनुः पुलस्त्यः पुलहश्च गौतमः ।
रैभ्यो मरीचिश्च्यवनोऽथ दक्षः कुर्वन्तु सर्वे मम सुप्रभातम् ॥
सनत्कुमारश्च सनन्दनश्च सनातनोऽप्यासुरिसिंहळौ च ।
सप्त स्वराः सप्त रसातलानि कुर्वन्तु सर्वे मम सुप्रभातम् ॥
सप्तार्णवास्सप्त कुलाचलाश्च सप्तर्षयो द्वीपवनानि सप्त ।
भूरादिलोका भुवनानि सप्त कुर्वन्तु सर्वे मम सुप्रभातम् ॥
महाभारतमाख्यानं क्षितिं गां च सरस्वतीम् ।
ब्राह्मणान्केशवं चैव प्रातरुत्थाय कीर्तयेत् ॥
ब्रह्माणं शङ्करं विष्णुं यमं रामं दनुं बलिम् ।
सप्तैतान्संस्मरेन्नित्यं महापातकनाशनम् ॥
कौसल्या सुप्रजा राम पूर्वा सन्ध्या प्रवर्तते ।
उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकम् ॥

प्रह्लादनारदपराशरपुण्डरीक व्यासाम्बरीषशुक शौनकभीष्मदाल्भ्यम्।
रुक्माङ्गदार्जुनवसिष्ठविभीषणादीन्पुण्यानिमान्परमभागवतान्स्मरामि ॥

पुण्यश्लोको नळो राजा पुण्यश्लोको युधिष्ठिरः ।
पुण्यश्लोको हरिश्चन्द्रः पुण्यश्लोकः पुरूरवाः ।
पुण्यश्लोका च वैदेही पुण्यश्लोको जनार्दनः ।
कर्कोटकस्य नागस्य दमयन्त्या नळस्य च ।
ऋतुपर्णस्य राजर्षेः कीर्तनं कलिनाशनम् ॥
कीर्तनं पापनाशनम् । कीर्यनं पुण्यवर्धनम् ।
कीर्तनं आयुष्यवर्धनम् ॥

अग्नित्रयं त्रीणि च पुष्कराणि नामत्रयं त्रीणि पदानि विष्णोः ।
रुद्रस्त्रिणेत्रस्त्रिपथा च गङ्गा एतानि दुस्स्वप्नविनाशनानि ॥

गङ्गाया दक्षिणे भागे योजनानां शतद्वये ।
पञ्चयोजनमात्रेण पूर्वाम्बोधेस्तु पश्चिमे ॥
वेगवत्त्युत्तरे तीरे पुण्यकोट्यां हरिः स्वयम् ।
वरदः सर्वभूतानामद्यापि परिदृश्यते ॥

वपापरिमळोल्लासवासिताधरपल्लवम् ।
मुखं वरदराजस्य मुग्धस्मितमुपास्महे ॥

भक्ताभीष्टफलप्रदाङ्घ्रियुगळं कौशेयराजत्कटि
लक्ष्मीमङ्गलमन्दिरोरसि लसन्मुक्तावळी कौस्तुभम् ।
हस्तैश्शङ्खरथाङ्ग पङ्कजगदा बिभ्राणमभ्राकृति
राकाचन्द्रमुखं सुजातमकुटं श्री सारनाथं भजे ॥

समुद्रवसने देवि पर्वतस्तनमण्डिते ।
विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥

अहल्या द्रौपदी सीता तारा मण्डोदरी तथा ।
पञ्च कन्याः स्मरेन्नित्यं महापातकनाशनम् ॥

आदित्यमंबिकां विष्णुं गणनाथं महेश्वरम् ।
पञ्च देवान्त्स्मरेन्नित्यं महापातकनाशनम् ॥

मैनाकं मन्दरं मेरुं कैलासं गन्धमादनम् ।
पञ्च शैलान्त्स्मरेन्नित्यं महापातकनाशनम् ॥

गोकोटिदानं ग्रहणेषु काले प्रयागगङ्गायुतकल्पवासः ।

यज्ञायुतं मेरुसुवर्णदानं गोविन्दकीर्ते न समं शतांशैः ॥

गोविन्देति सदा स्नानं गोविन्देति सदा जपः ।
गोविन्देति सदा ध्यानं सदा गोविन्दकीर्तनम् ॥

गोविन्दो दुःखनाशाय भवनाशाय माधवः ।
वामनः पापनाशाय केशवः क्लेशनाशनः ॥

गोविन्द गोविन्द हरे मुरारे गोविन्द गोविन्द मुकुन्द कृष्ण
गोविन्द गोविन्द रथाङ्गपाणे गोविन्दगिविन्द नमामि चेतः ॥

इति प्रातःस्मरणम् ॥

## अथ अधीतस्य अविस्मरणमन्त्रः ॥

वेदाक्षराणि यावन्ति पठितानि द्विजातिभिः ।
तावन्ति हरिनामानि कीर्त्तितानि न संशयः ॥

यदक्षरपदभ्रष्टं मन्त्राहीनं तु यद्भवेत् ।
तत्सर्वं क्षम्यतां देव नारायण नमोऽस्तु ते ॥

विसर्गबिन्दुमात्राणि पदपादाक्षराणि च ।

न्यूनानि चातिरिक्तानि क्षमस्व पुरुषोत्तम ॥

निर्जित्यवादसमये ऋषीन्त्सर्वानुपस्थितान् ।

गावो येन हृतास्तस्मै नमोऽस्तु ब्रह्मरातये ॥

ॐ अथातोऽधीत्याधीत्या निराकरणम् । प्रतीकं मे विचक्षणम् । जिह्वा मे मधु यद्वचः । कर्णाभ्यां भूरिशुश्रुवे मा त्वꣳ हार्षीः श्रुतं मयि । ब्रह्मणः प्रवचनमसि । ब्रह्मणः प्रतिष्ठानमसि । ब्रह्मकोशोऽसि सनिरसि । शान्तिरस्यनिराकरणमसि । ब्रह्मकोशं मे विश । वाचा त्वापिदधामि । वाचा त्वापिदधामि । तिष्ठ प्रतिष्ठ । स्वरकरणकण्ठ्यौरस्यदन्त्यौष्ठ्यग्रहण–धारणोच्चारण–शक्तिर्मयि भवतु । आप्यायन्तु मेऽङ्गानि वाक्प्राणश्चक्षुश्श्रोत्रँ य्यशो बलम् । यन्मे श्रुतमधीतं तन्मे मनसि तिष्ठतु तिष्ठतु ॥

इति अधीतस्य अविस्मरणमन्त्रः ॥

इति काण्वमन्त्रामृतं समाप्तम् ॥

ॐ तत्सत्